
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

प्रति नं. आठ ग्यारह

॥अथ वैयाकरणभूषणारंभः॥

Acc. NO. ~~3010~~ M-1633
Title - वैयाकरणभूषणसारः
Author - कौंडभट्ट.
Date - शके 1780.
Sub - व्याकरण.
folio - 61.
Xerox - 122.

॥ श्रीगणेशाय नमः॥ श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणं॥ स्फोटरूपं यतः सर्वं जगदेतद्विवर्त्तते॥१॥
अशेषफलदातारं भवाब्धितरणे तरिं॥ शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणं॥२॥ पाणिन्यादिमुनीन्प्रणम्य पि
तरं रंगोजिभट्टाभिधं द्वैतध्वान्तनिवारणादिफलिकापुंभावयाग्देवतां॥ ढुंढिगौतमजैमिनीयवचनव्या
ख्यातृभिर्दूषितान्सिद्धान्तानुपपत्तिभिः प्रकटये तेषां च तो दूषये॥३॥ प्रारिप्सितप्रतिबंधकोपशमना
य कृतं श्रीफणिस्मरणरूपं मंगलं शिष्यशिक्षार्थं निबध्नन्चिकीर्षितं प्रतिजानीते॥ फणिभाषितभा
ष्याब्धेः शब्दकौस्तुभ उद्धृतः॥ तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते॥१॥ उद्धृत इत्यस्य [illegible] स्याभिप्रेतिदूरे
षः॥ भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिः शब्दकौस्तुभोक्तार्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय॥ अ
न्यथा तन्मूलकस्यास्य ग्रंथस्याप्याधुनिकोत्प्रेक्षितत्वापत्तौ पाणिनीयानामनुपादेयत्वापत्तेः॥ त
त्र निर्णीत इत्युक्तिस्तोऽप्यधिकजिज्ञासुभि[illegible]॥१॥ प्रतिज्ञातमाह॥ फलव्यापारयोर्धातुराश्र

शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुं॥

येतु तिङः स्मृताः ॥ फलेप्रधाने व्यापारस्तिङर्थस्तु विशेषणं ॥२॥ धात्वर्थत्वं तत्र इति वचनविपरिणामेनान्वयः ॥ फलं विक्लित्यादि ॥ व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया ॥ उक्तं च वाक्यपदीये ॥ यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ॥ आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति ॥ न च साध्यत्वेनाभिधाने मानाभावः ॥ पचति पाकं करोति कृतिः इत्यादौ धात्वर्थावगमाविशेषेपि क्रियान्तराकांक्षानाकांक्षयोर्दर्शनस्यैव मानत्वात् ॥ तथा च क्रियान्तराकांक्षानुत्थापकतावच्छेदकरूपं साध्यत्वं ॥ तद्रूपवत्त्वमसत्त्वत्वं ॥ एतदेवाद्यासत्त्वभूतो भावश्च तिङ्पदैरभिधीयते इति वाक्यपदीयमिति द्रष्टव्यं ॥ अयं च व्यापारः फूत्कारत्वाधःसंतापनत्व यत्नत्वादिना तद्रूपेण वाच्यः ॥ पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् ॥ न च नानार्थतापत्तिः ॥ तदादिन्यायेन शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् ॥ आख्याते क्रियेयत्त्वे व्यवस्थाप्यवच्छेदकबुद्धिविशेषैर्मादायैव ॥ उक्तं च वाक्यपदीये ॥ गुणभूतैरवयवैः समूहः क्रमजन्मनां ॥ बुद्ध्या प्रकल्पिताभे

न

७७

क्य

बुद्धिविशेषादेः

॥धा॰म॰सा॰
॥२५

छेद

दः क्रियेति व्यपदिश्यते ॥ इति ॥ धात्वर्थं निरूप्य तिङर्थमाह ॥ आश्रये इति ॥ फलाश्रये व्यापाराश्रये चेत्यर्थः ॥
फलाश्रयः कर्म ॥ व्यापाराश्रयः कर्ता ॥ तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङः शक्तिः ॥ अनन्यलभ्यत्वा
त् ॥ आश्रयत्वाव च्छिन्ने चाश्रयत्वं ॥ तत्त्वं च क्रियाविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते ॥ ननु चनयोराख्यातार्थत्वे
किं मानं ॥ प्रतीतेर्लक्षणया आक्षेपात्प्रथमान्तपदाद्वा संभवादिति चेन्न ॥ अत्रोच्यते ॥ लः कर्मणि च भावे चा
कर्मकेभ्य इति सूत्रमेव मानं ॥ अत्र हि चकारात्कर्तरि कृदिति सूत्रोक्तं कर्तरीत्यनुकृष्यते ॥ बोधकतारूपं तिबादिश
क्तितस्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते ॥ न कारकविसर्गादि निष्ठा कर्म
करणादिबोधकशक्तिमादाय व्यासा […] दिविध्यानवकाशात् ॥ न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे ॥ तथा च कर्तृ
त्वं वृत्तिः कर्मत्वं फलमेवार्थोऽस्त्विति वाच्यं ॥ फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पना
योगात् ॥ अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्तर्हि

वाश्रयत्व

॥२॥

तामपि कर्तृकर्मादिवाच्यत्वेन सिध्यतः॥ कर्तरि स्यादिति चेत् चलः कर्मणीत्यनेन तुल्ययोगक्षेमं॥ अपि च॥ मीमांस
कानां कृतामिचाख्यातानामपि कर्तृवाच्यत्वमस्तु॥ भावनायाः एवास्येण तदादिवत्कर्तीति संभवेवाच्यत्वे
मास्तु॥ तथा सति प्राधान्यं तस्या न स्यादिति चेन्न॥ घटमानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः॥
पचतीत्यादौ भावनया विवरणदर्शनाद्वाच्यत्वमिति चेन्न॥ पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषय
त्वाविशेषात्॥ न च कर्तुर्विवरणं तात्पर्यार्थविवरणं पाकं करोतीत्यत्र द्वावपि कर्मत्वविवरणवदितरेतरद्वंद्वसमु
च्चयात्॥ विवरणवह्ना न तदर्थनिर्णायकमिति वाच्यं॥ भावनायामपि तुल्यत्वात्॥ किं च पचति देवदत्त इत्यत्रा भेदा
न्वयदर्शनात्कर्तुर्वाच्यत्वमावश्यकं॥ पचत्यादेर्देवदत्त इति यत्र॥ न चाभेदबोधे समानविभक्तिमत्त्वं नियामकं तत्र
त्वेनास्तीति वाच्यं॥ स्तोके नयजेत स्तोकं पचति रा अपुरुषरूपा दावप्यभेदबोधानापत्तेः॥ न चैल लक्षणया कर्तुस
केतोऽस्त्वनानाधिकरण्यं॥ पंकजादियौगिकानामपि द्रव्यवाच्यत्वानापत्तेः॥ एवं वैश्वदेवीत्यादि तद्धिता
नामपि अनेकमन्यपदार्थत्वास्पदत्वात् तदनुशासनेनापि पिंगे अक्षिणी यस्याः विश्वेदेवता अस्या इति वि

वादे

॥पं॰म॰॥
॥३॥
द्रव्य
प

गतप्रदर्शनात्प्रधानषष्ठ्यर्थे तृतीयानुशासनलाभात्॥ तथा चारुणया पिंगाक्ष्या एकहायन्या सोमं क्रीणातीति वाक्ये द्रव्या
नुरक्तारुण्यस्य स्वस्वयाप्योपात्त … एवान्वयप्रतिपादिकारुणाधिकरणे स्थेदापत्तिः॥ द्रव्यवाचकत्वसाधकसूत्रयुक्ते
सामानाधिकरण्यस्य मारी लोपपत्तेरिति विस्तरेण प्रपञ्चितं वैयाकरणभूषणे॥ तिङ् इति॥ बोधकता रूपा ...
स्तिङ् बोधे वेत्यभिप्रेत्येदं॥ पदार्थं निरूपयन् व्याख्यायां निरूपयति॥ फलेइति॥ विक्लित्यादिफलं प्रति॥ तिङर्थः॥ कर्तृकर्म
संख्याकालाः॥ तत्र कर्तृकर्मणी व्यापारफलयोर्विशेषणे॥ संख्या कर्तृप्रत्यये कर्तरि॥ कर्मप्रत्यये कर्मणि॥ समान
प्रत्ययोपात्तत्वात्॥ तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्य
कारणभावः फलितः॥ नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थे एवान्वयादाख्यातार्थसंख्याप्रकार
कबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः॥ सोपि चैत्रः पचमुखं दृश्यते देवदत्तो भुङ्क्ता
न्तीत्यादौ चैत्रस्कार्पयोराख्यातार्थान्वयादितरविशेषणत्वघटितनहुत्तिगौरवं॥ इदमपि कर्तृकर्मणोराख्या
तार्थत्वे मानमिति स्पष्टं भूषणे॥ कालस्तु व्यापारे विशेषणं॥ तथाहि॥ वर्तमाने लडित्यत्राधिकारादुक्तो रिति लं

वासुदेव
॥३॥

तथ

ना

दि

नचधात्वर्थेतदंशप्राधान्याद्व्यापारमेवाख्यातयतीतितन्नैवतदन्वयः॥ नचसंख्यावत्त्वेतत्कर्मणोरेवान्वयः सूक्ष्मः॥ अ
नीतभावनायां कर्त्तरिपचतीत्यापत्तेः॥ अपाक्षीदित्यनापत्तेश्च॥ पाकानारंभदशायां कर्त्तरि लेपक्ष्यतीत्यनापत्तेश्च
नापिफलेतदन्वयः॥ फलानुत्पत्तिदशायांव्यापारसत्त्वेपचतीत्यनापत्तेः प्रक्ष्यतीत्यापत्तेश्चेत्सर्वथैव॥ नचाभयात
जडीकृतफलेवरस्यधात्वानानुकूलव्यापारानुसाराद्उत्तिष्ठतीतिप्रयोगापत्तिः॥ परस्यतत्रस्थानाद्प्रयोगात्॥ किंचित्वे
ष्टादिनावगतोच्चायमुत्तिष्ठतिशूं [illegible] भावात्फलेतुनजायतेइतिलोकप्रतीतेरिष्टत्वात्॥ एवंचतिङर्थोविशेषणमे
व॥ भावनैवप्रधानं॥ यद्यपिप्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैवप्राधान्यमन्यत्रदृष्टं॥ तथापिभावप्रधानमा
ख्यातंसत्त्वप्रधानानिनामानीतिनिरुक्तम्भूवादिसूत्रस्थभाष्याच्चक्रियाप्राधान्यबोधकभाष्यात्धात्वर्थभावनाप्राधा
न्यमध्यवसीयते॥ अपिचाख्यातार्थप्राधान्येतस्यदेवदत्तोभिः समभेदान्वयात्प्रथमान्तस्यप्राधान्यापत्तिः॥
तथाचपश्यमृगोधावतीत्यत्रभाष्यसिद्धैकवाक्यतानस्यात्॥ प्रथमान्तमृगस्यधावनक्रियाविशेष्यस्यदृ
शिक्रियायांकर्मत्वापत्तौद्वितीयापत्तेः॥ नचैवंप्रथमासामानाधिकरण्याभावप्रसंगः॥ एवमपिद्वितीया

वै.भू.सा.
॥५॥
त्या

यादुर्वारत्वेन पश्य मृगो धावतीति वाक्यस्यैवासंभवापत्तेः। न च पश्येत्यत्र तमिति कर्माध्याहार्यं। वाक्यभेदप्रसंगात् तत्र
दृष्यावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वादध्याहारेऽनन्वयापत्तेः॥ एवं च भावना
प्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयं॥ किन्तु आख्यातार्थकर्तृ
प्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः।
भावनाप्रकारकबोधं प्रति तु धातुजन्योपस्थितिवद्धात्वर्थभावनोपस्थितिरपि हेतुः पश्य मृगो धावति प
चति भवतीत्याद्यनुरोधादिति दिक्॥ इत्थं च पचतीत्यत्र काश्रयिका पाकानुकूला भावना। पच्यतेऽत्र
काश्रयिका विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे तु आख्यातार्थकर्त्रादिभिस्तदर्थ
स्याभेदान्वयः। घटो नश्यतीत्यादावपि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः। स च व्यापारः प्र
तियोगित्वविशिष्टनाशसामग्रीसमवधानं अत एव सत्यां तस्यां नश्यतीति तदपायेन नष्टः तद्भावित्वे नश्य
तीति प्रयोगः। देवदत्तो जानातीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार

श्री

वासुदेव

४५

वे

रातबोध्यः। सत्यां ततः आश्रयत्वेनेति रीत्योह्यं। २। नन्वाख्यातस्य कर्तृकर्मरूपत्वे पचतीत्यत्रोभयबोधापत्तिः। कर्तृमात्रबोध
वत्कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह। फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः। व्यापारे शप्श्न
माद्यास्तु द्योतयन्त्याश्रयान्वयं॥३॥ तङादयः फले आश्रयान्वयं द्योतयन्तीति फलान्वय्याश्रयस्य कर्मत्वात्तद्द्योतकाः।
कर्मद्योतकाः। व्यापारान्वय्याश्रयस्य कर्तृत्वात्तद्द्योतकाः कर्तृद्योतका इति समुदायार्थः। ते द्योतयन्ति। तात्पर्यं ग्राहयन्ति
३। नन्वेवं क्रमादमुना रदरूपबोधिसत्त्वादौ पच्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः कर्मणः कर्तृत्वविवक्षायां कर्तरि

तिदेशे

लकारे सति कर्मवत्कर्मणा तुल्यक्रियः इत्यनेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोध्या
व्यापारे एवाश्रयान्वयाच्च। अबोधीत्यत्रापि बुध्यतेः कर्तरि लुङ् तस्य दीपजनेति चिण् चिणो लुगिति तस्य लुगिति सा
ध्यनादिसाहाय्यात्। उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्। तस्माद्यथोचितं ग्राह्यं द्योतकत्वं यथागमं॥५॥ क
र्मकर्तृविषयादौ पच्यते ओदनः स्वयमेवेत्यादौ। अत्र क्लेदो ओदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः क्रमादिसा
दिपदग्राह्यं अत्र सामान्यविशेषभावापन्नपूर्वक एकनारदविषयकत्वानानुकूलः ~~~~ अभिन्नाश्रयको तीतो व्यापार

श्रू. रा

॥५॥

इति बोध्यः। यथोचितमिति। सकर्मकधातुसमभिव्याहृतभावसाधारण विधिविधेयश्चिण्यगादिकर्मद्योतकमि
ति भावः। ८। एवं लडाद्यंते भावनायाः अवाच्यत्वं वदतः प्राभाकरादीन् प्रतिस्वीचीकराह न्यायेन सोपपत्तिकं वाक्या
र्थमुपवर्ण्य फलव्यापारयोरित्यत्र प्रतिलाते धातोर्व्यापारवाचित्वं व्यवस्थापयति। व्यापारो भावना सैवोत्पादना सैव
च क्रिया। अकर्मकतापत्तेर्नेति यत्नोर्थः इष्यते। ५। पचति पाकमुत्पादयति पाकानुकूलभावनात्तादृग्युत्पादनेति विवर
णात् क्रियमाणस्यापि तद्वाच्यत्वेति भावः। व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारादिरूपेण वाच्यताध्वन
यितुमुक्तं। अत एव पचतीत्यत्राधः संतापनत्व फूत्कारत्व चुल्ल्युपरिधारणत्व यत्नत्वादिभिर्बोधः सर्वसिद्धः। न चैषां
शक्यतावच्छेदकत्वे गौरवापत्तेरिति त्वमेव तत्तदवच्छेदकं वाच्यं। रथो गच्छति जानातीत्यादौ च व्यापारत्वादिप्रकारकबो
धो लक्षणयेति नैयायिकरीतिः साध्वी। शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्गुरुणि संभवात्। तयो
र्वैषम्ये बीजाभावात्। न च पचति पाकं करोतीति यत्नार्थकरोतिना विवरणात् यत्न एवार्थ इति वाच्यं। रथो गमनं
करोति बीजादिनांकुरः कृत इति दर्शनात् यत्नो यत्नार्थकतायाः असिद्धेरिति। किंच भावनायाः अवाच्यत्वे पचंतं भा

पं.

५

वयतीत्यत्रैव घटो भवतीत्यत्रापि द्वितीया स्यात् न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यं
त्वन्मते अनुगतकर्तृत्वस्यैव दुर्वचत्वेन घटस्याकर्तृत्वात्। स्वाश्रयत्वस्य कारकत्वे च प्रयोक्तृत्वस्य बाधकत्वाभावात्। धात्वर्था
नुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्याप्तत्वात्। अविच्छिन्नभावनाया अवाच्यत्वे धात्वर्थानां सकर्मकत्वाकर्मकत्ववि
भाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचित्वं वा सकर्मकत्वं भा
वनाया वाच्यत्वमंतरेणासंभवि। अन्यतमत्वं तत्त्वमिति चेन्न। एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात्। तदेतद
भिसंध्यायाह। व्यापार इति। अयं भावः। व्यापारवाच्यत्वपक्षे फलमात्रमर्थ इति फलितं। तथा च करोतीत्यादौ यत्नमप्रती
तीतेस्तन्मात्रवाच्यत्वमभ्युपेयं। तथा च यती प्रयत्ने इतिवत् फलस्थानीययत्नवाचित्वाविशेषादकर्मकत्वापत्ति
इतरीत्या रेति। तथा च न हि यत्नस्तत्र फलस्थानीयत्वेनेति शेषः। व्यापार इति धातुमात्रोपलक्षणं सर्वेषामकर्मकतासकर्मक
दुर्वारे ता वा स्यादिति भावः। अथवा व्यापाराभावेनेत्यर्थेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन्नैया
यिकाभ्युपगतं ज्ञानातिरिक्तादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति। व्यापार इति। अयं भावः। फलांशस्या

॥६॥

वाच्यत्वे व्यापार एव धात्वर्थः स्यात् । तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः । न च व
आदौ सकर्मकव्यवहारो भाक्त इति नैयायिकोक्तं युक्तं व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासंभवात् । न हि तीरे गंगापद
स्य भाक्तत्वेऽपि तेन स्नानादिकार्यकर्तृत्वं । एवं च न हि यत्नत्वस्य यत्नमात्रमित्यर्थः । ५ । अत एवाह । किंतूत्पादन
मेवार्थः । कर्मवत्स्यादित्यत्रापि । कर्मकर्तर्यन्यथा तु न भवेत्तर्हीत्यादि । उत्पादनं उत्पत्तिरूपफलसहितयत्नादिरित्यर्थः
त्वर्थः । फलस्य वाच्यत्वे युक्त्यन्तरमाह । अत इत्यादि । यतः स्वीययत्नमात्रमर्थो नेष्यते अतः । कर्मवत्स्यादिति पदेन कर्मव
त्कर्मणा तुल्यक्रिय इति सूत्रे लक्ष्यते । अयमर्थः । यत एव तस्योत्पादनार्थं कर्ता अतः पच्यते ओदनः स्वयमेवेति च क्रियते घ
टः स्वयमेवेति प्रयोगादयोऽप्युपपद्यन्ते । अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात् इत्याशयः । यथा दृश्यते घटः स्वयमे
वेति न दर्शनस्य घटवृत्तित्वात् तथा यत्नस्यापीति तथा प्रयोगानापत्तेरिति । ६ । नन्वेवं स्नानादेरवलानादेरपि वि
षयावच्छिन्नावरणभंगादिफलवाचित्वमावश्यकं । अन्यथा सकर्मकतानापत्तेः । तथा च लायते घटः स्वयमेवेति क्रि
न स्यात् । एवं स्नामो गम्यते स्वयमेवेत्याद्यपीति इत्याशंकां मनसि कृत्वाह । निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।

त्

नतु प्राप्यकर्मणीति सिद्धंतो व्यवस्थितः ॥७॥ ईप्सितकर्म त्रिविधं निवर्त्यं विकार्यं प्राप्यं च । तत्राद्ययोः कर्मत्वव्यवहारो नास्ते
प्राप्यत्वं च क्रियाकृतविशेषानुपलभ्यमानत्वमिति स्फुटमर्थनिर्णये वक्ष्यते । न सूर्यं पश्यति केन चिद्दृष्टः ग्रामो यं केन चिद्गत इति
दृश्यं कर्म दर्शनेनोगन्तुं । घटं करोतीति निवर्त्ये सोमं सुनोतीति विकार्ये तन्तुऽ ह्लादुह्यक्यमितिन प्राप्ये । तथा च घटादेर्द्रव्या
दे प्राप्यकर्मत्वाभोक्तातिप्रसंग इति भावः ॥७॥ नूनं फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः क्रियावाचित्वाविशे
षात् । फलस्योपलक्षणे एकक्रियायाः एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति ।
तस्मादव्ययसकर्मकाणां फलवाचित्वं अकर्मकाणां मन्त्रिर्विवादमेव । भूसत्तायामित्यादौ तु ह्लासनाच्य अत एव चार्थः
पचि रितिभाष्यं संगच्छते । इति दिक् ॥७॥ नन्वेवं सिध्यतु फलव्यापारयोर्वाच्यत्वं किंतु आख्यातवाच्यैव सा भावनानर्थ
तोः प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति न्यायविरुद्धत्वात् तद
गमेर्हि दृश्यते इति न्यायविरुद्धत्वात् । एवं च स्वयमुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं आख्याता
र्थव्यापाराश्रयत्वं च कर्तृत्वं वाच्यमित्यादि वदन्तं मीमांसकमन्यं प्रत्याह । तस्मात्करोतिर्यत्नोः स्याद्व्याख्यानं न खसो तिङं
पच्यता न्वयत्वान्यां किं पक्वं पक्वमित्यपि ॥८॥ तस्मादभिप्रायस्थ हेतोः सचेष्टं फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान्

43

॥५॥

गा

रतिम[illegible]योऽप[illegible]तेः। संयोगाभावत्वात्। फलानुत्पत्तिदशायां व्यापारसत्त्वे पाको भवती[illegible]सो[illegible]नापत्तेः। व्यापारविगमे फ
लसत्त्वे पाको विद्यत इत्यापत्तेश्च। पचतु भावप्रत्ययस्य पचादेरनुकूलव्यापारस्याविवक्षितत्वानुपपत्तिरिति तन्न। कर्त्राख्यातव
त्कर्तरि कृदित्यनुशासन एव तत्प्राधान्यलाभे भावे घिञ्प्रत्ययकानुशासनवैयर्थ्यापत्तेस्तद्विरोधापत्तेश्च। अथ व्यापारे
पि धात्वर्थत्वमभ्युपेयमिति चेन्न हि धात्वर्थत एव सकलव्यापारलाभसंभवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति प
चतीत्यस्य पाकं करोतीति विवरणात् पाकं करोतीति धात्वर्थस्य व्याख्यानं विवरणं अतस्तदपि नाख्यातार्थत्वसाधकत्वमिति भावः।
मीमांसकोक्तं बाधकं उद्धरन्नन्यमतं दूषयति न खल्वित्यादिना। नासोऽस्तीति व्याख्याने पक्वे यानीत्यादौ अनन्वयापत्तेरित्यर्थः।
अयंभावः प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थप्राधान्यं नित्यं[illegible]ति विशेषणतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तर
प्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः तथा च पक्वे वानीत्यादौ पाकः कर्मकारके क्तचतुप्रत्ययार्थः
कर्तृकारके तयोश्चारुणाधिकरणरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासंभव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यै
वाभावे च प्राधान्यबोधकं उक्तकार्यकारणभावः। न चासंबध्यमानमुक्तं च श्रुत्या धात्वर्थभावयोः तदेकांशनिवेशात्तु
व्यापारे स्यान्न विद्यत इति भट्टपादोक्तरीत्या संबध्यसामान्येन कारकाणामन्वयः शास्यः योग्यताविरहात्। अन्वयप्रयो

स्य

य

५१

त्त्वयाचकर्त्तव्यं शुक्ले इत्यादौ चानीयर् । आदिना ज्योतिष्टोमेन
याजयेच्च कर्ता । विनाध्यातुत्वमेव न । कार्यमित्यत्र अर्हे कृत्यर्थे इति कर्मणि ण्यत् । पचनीयमित्यादौ चानीयर् । आदिना ज्योतिष्टोमेन
नीत्यादौ णिनिः करणे उपपदे कर्त्तरि एते च क्रियायोगमन्तरेण संगतत्वाद्वाच्यतां बोध्ययन्ति । विना क्रियां कारकत्वासंभवेन तत्
द्वाचकप्रत्ययस्याप्यसंभवात् । न च गम्यमानक्रियामादाय कारकयोग इति भट्टहरी तिर्युक्तः । आख्यातेपि तथात्वात् । यतो नत्रा
पि भावना वाच्यत्वासिध्यापत्तेः । अथ लिंग संख्यान्वयानुरोधात्कर्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपात् भावनाप्रत्यय
स्यादितिमतं तत्र हि आख्यातेपि कर्ता वाच्यः स्यात् । पच्यतानित्या...दिकाल कारकान्वयानुरोधाद्भावनाया अपि तत्स्यावश्य
कत्वाच्चेति भावः । अपि नाहेत्वंतरसमुच्चयः । तथाहि न खे भिन्नः नेत्र भिन्नः हरिणा त्रातः हरित्रात इत्यादौ कर्तृकरणे कृ
ता बहुलमिति समासो न स्यात् पुरुषो राज्ञो भार्या देवदत्तस्येत्यादिवदसामर्थ्यात् । न चाध्याहृतक्रियाद्वारा साम
र्थ्यमिति वाच्यं । दध्योदनो गुडधाना इतिवत् । अन्यथा उत्पन्नेन व्यंजनं भक्षेण मिश्रीकरणमिति समासो न स्यादि
ति वाच्यं । तत्र विध्यानर्थक्यापादगत्तात् तथा स्वीकारे पि हरित्रातमित्यादौ साक्षाद्वात्वथा न्वयो [illegible] नोपपद्यमानत्वे
कर्तृकरणे कृता बहुलं इत्यस्याक्षेपेण परस्परासंबधेत्यसयोगात् । न चैकस्य क्रियान्वयित्वमेव सामर्थ्यमिति वा
च्यं । असूर्यपश्या इत्यादेरसमर्थसमासत्वानापत्तेः । इष्टापत्तौ तु अनुवृत्तः सर्वत्र इति कर्यस्तत्र वृत्तः सर्वत्रेति क इत्या

जकरूपत्वस्य तत्वात् क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं विवरणेन धात्वर्थत्वेन त्वर्थयोः
कर्मत्वकर्तृत्वे दर्शयति। इतरवाच्याकमिति। वस्तुतः प्रत्ययार्थः प्रधानमित्यस्यायं प्रधानं स प्रत्ययार्थ एवेति वा यः प्रत्ययार्थः स
प्रधानमेवेति नार्थः अजा अश्वा छागीत्यादौ स्त्रीप्रत्ययार्थस्त्रीत्वस्येव प्राधान्यापत्तेः। छाग्यादेरनापत्तेश्च। किं तु॰ सर्गौ ये
विशेष्यत्वादिना बोधस्तु तथाव्युत्पत्त्यनुरोधात्। अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः। लक्षणायामालंकारिणां
ज्ञाप्यतावच्छेदकप्रकारक एव बोधो न तु नैयायिकानां। घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकनव्यानां
बोधो न तद्व्युत्पत्तिरहितानामन्येषां तेषां तन्निराकांक्षमेवेत्यादिकं संगच्छते। अत एव प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाण
त्वादित्याह भगवान्पाणिनिः। प्रधानप्रत्ययार्थ इति वचनं न कार्यं। अर्थस्य तथाबोधस्यान्यप्रमाणत्वाद्व्युत्पत्त्यनुसारित्वादिति हि
तदर्थः। एवं सत्यपि नियामकापेक्षणे च भावप्रधानमाख्यातमिति वचनमेवेत्यत्र युक्तमिति सुधीभिरूह्यं। तदागमस्तन्न्यायो विव
रणं चातिव्याप्तमित्याह। किं तत्पक्षमिति। कृभाविवरणं प्रतीतिश्च पक्षमित्यत्रापीति तत्रापि भावनावाच्यास्यादिति भावः। नन्व
स्तु तिङ॰ वस्तुतामपि भावनावाच्येत्यत आह। अपीति। तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इ
तिभावः। भवद्रीत्या प्रत्ययार्थत्वात्साध्यायापत्तिश्चेति ध्येयं साध्यकर्तारमाह। किं कार्यं पचनीयं चेत्यादि दृष्टं चेद्दृश्यपि। किं चक्रि

दी

रू

॥८॥

कर

ये

पत्तेः। न चात्र समासविधायकाभावः। सहसुपेत्यस्य सत्त्वात्। अन्यथा समर्थसमासोपि विधायकाभावान्न स्यात्। वि
चभावनायास्तिङर्थत्वे भावयति घटमितिवद्भवति घटमित्यपि स्यात् धात्वर्थफलाश्रयतया कर्मत्वसत्त्वात्। न चाख्या
[illegible]ख्यातार्थभावनाश्रयत्वेन कर्तृत्वसत्त्वात्तत्संख्यया कर्मसं[illegible]ख्याया बाध्यान्न द्वितीयेति वाच्यं। आख्यातार्थव्यापारा
श्रयस्य कर्तृत्वे पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः। ग्रामं गमयति देवदत्तो
विष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिकर्मतानापत्तेश्च। तथा च ग्रामाय गमयति विष्णुमित्रमि [देव:]
त्यपि न स्यात्। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनीति गत्यर्थकर्मण्येव द्वितीयाचतुर्थीविधानात्। एतेन
णिजन्ते आख्यातार्थउभयवृत्त्याश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृत्वे पास्तं। किंच तस्मिन्प्रयोगे य आख्यातार्थः स्व
स्यावश्यकत्वे आख्यातप्रत्ययदेवदत्तः पचतीति वाक्ये देवदत्तस्याकर्तृतापत्तेरित्यादिकं। सत्त्वानुपपत्तिमपि मानत्वे
न प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति। किंचेति। धातुसंज्ञाविधायकं भूवादय इति सूत्रं। तत्र भूरर्थथा
श्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः ततो भूयो आदीयेषामिति बहुव्रीहिः। तथा च भूप्रभृति

[नौ] तृतीयापत्तेः ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृतापत्तौ

प्र·म·सा·
११९४

तच्च क्रियावाचकत्वेन। त्वं

योयासदृशस्तदर्थः। तथा च क्रियावाचित्वे सति गणपठितत्वं धातुत्वं पर्यवसन्नं। अत्र क्रियावाचित्वमात्रोक्तौ वर्जनादि
क्रियावाचिहिरुक्नानारस्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तं। तावन्मात्रोक्तौ चाह। सर्वनामाव्ययादीनं
यावादीनां प्रसंगतः। नहि तत्पाठमात्रेण युक्तमित्याकरे स्फुटं।१०। गणपठितत्वमात्रोक्तौ सर्वनाम्नो यो या तस्या
धातुत्वे स्यात्। तथा च याः पश्यसीत्यादौ यातो धातो रित्याकारलोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदो
क्तस्यैव तत्र ग्रहणात् सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वादत आह वेति। अव्ययेवारस्यादेवतिप्रसंगः। तादृश
स्यैव गणे पाठेन निर्णयासंभवात्। तथा च विकल्पार्थकवा वातीति प्रयोगापत्तिः। न च गत्यंगंधनाद्यर्थनिर्देशो
नियामकः। तस्यार्थानिर्देशनादिति भाष्यपर्यालोचनया धुनिकत्वलाभात्।१०। न च वस्तुतः क्रियावाचित्वे गण
पठितत्वं धातुत्वं क्रियाचे धात्वर्थ एव न व्यापारस्सांसारकामपाद्यते। धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थ
त्वा। अन्योन्यसंश्रयः स्पष्टस्तस्माद्वस्तु यथाकरं।११। यदि क्रियात्वं धात्वर्थत्वमेव नहि धातुत्वग्रहे तदर्थत्वग्रह
क्रियात्वग्रहः। क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रहः इत्यन्योन्याश्रय इत्यग्रपदं पूरयित्वा व्या
ख्यादिति भावः।

चा

स्य

रव्येये। यथाश्रुतेऽन्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबंधं कृत्वाभ्युपगमेनासंगत्यापत्तेः। नचान्यतमत्वं धातुत्वं भूवादय इत्य
स्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह। अस्तीति। व्यापारसंतानः क्रियातद्वाचकत्वे सति गणपठितत्वं। अर्थः। ननु सत्तादी
न्फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमनुच्यतां धात्वर्थत्वात्तेषां क्रियात्वेन व्यवहारो भाष्या
दोषतोऽप्युपपत्तेरिति चेन्न। अन्यतममध्ये विकल्पस्यापि विकल्पयतीति प्रयोगानुसारेण प्रवेशाच्च पृथक्त्वेन तद
र्थके चेत्स्वव्यये उक्त[?]शिलागणपठितत्वसत्त्वेनाव्याप्तेरिति॥१॥ नन्वस्यैव धातुत्वे अस्तीत्यादौ क्रियाप्रतीत्यभावाद
स्त्यादीनां तद्वाचका नाम धातुत्वप्रसंगः स्यात आह। अस्त्यादावपि धर्म्यंशो भाव्यस्य च हि भावना। अन्यत्राशेषभावा
नुसारं तथा न प्रकाशते॥२॥ अस्त्यादौ असभुविरूत्यादौ धर्म्यंशो धर्मिभागो। भाव्यो भाव्यत्वेन विवक्षितो अस्तेश्च। प्रती
यत एव। अयमर्थः। सत्तायोगतो न चेति प्रश्ने महत्तायत्त्वेनास्तीति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव। उ
त्पत्त्यादिबोधने तु स्तरां। रोहितो लोहितादासीद्धुंधुस्तस्य सुतोऽभवदित्यादिदर्शनात्। किंचात्र भावनाविरहे लडादिव्य
वस्था न स्यात्। तस्या एव वर्तमानत्वादिविवक्षायां क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेति वाक्यपदीया
त्वात्। नन्वेवमस्तीत्यत्रस्य कुतो न बुध्यते इत्याशंकायामाह। अन्यत्रेति। अशेषभावात्। भावनायाः फलसमानाधि

तद्विधानात्

विशेष

रणत्वात्। तथा च भावनायाः फलसमानाधिकरणत्वे तस्य एव कर्तृत्वे दोष इति भावः। नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरं स्यादेवास्तीत्यु
त्तरमपि स्यादिति चेदिष्टापत्तिः। आसन्नविनाशं कंचिदुद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्यापि सर्वसंमतत्वात्। तत्र
तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिगोचर एवेत्यवधारणादस्तीति नोत्तरमिति। ॥१२॥ ननु भावनायाः फलनियतत्व
लाश्रयस्य कर्मत्वात् सर्वेषां क्रियावाचकानां सकर्मकत्वापत्तिरित्यत आह॥ फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातुस्तयोर्धर्मिभे
दे सकर्मक उदाहृतः॥१३॥ एकनिष्ठतायां। एकमात्रनिष्ठतायां। भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादेः फल
स्य कर्मनिष्ठत्वेऽपि नातिव्याप्तिः अकर्मको यथा भ्वादिः। तयोः फलव्यापारयोराश्रयभेदे सकर्मक इत्यर्थः। उक्तं च वाक्यपदीये।
आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते। अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः इति। बिभ्रदिति तेन स्वधारणानुकू
लो व्यापारोऽत्र गम्यते इति भावः। तेन कर्मणा सकर्मकत्वं तु न अन्तर्भावात्। फलांशेन सामानाधिकरण्यादिति भावः। आत्मानं जा
नातीत्यादौ च द्वावात्मानौ शरीरान्तरात्मा च तत्रान्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति क
र्मवत्कर्मणेति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम्। नन्वसत्त्वभूतं क्रियाया धात्वर्थ
त्वे पाकस्येत्यादौ अपि तत्त्वापत्तिः। न चेष्टापत्तिः। कृदभिहितो भावो द्रव्यवत्प्रकाशते इति भाष्यविरोधादित्यत आह॥ अ

ना

ख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता। प्रकल्पिता यथा शास्त्रे सघञादिष्वपि क्रमः॥१४॥ आख्यातशब्दे पस्य
म्गोध्यावतीत्यादौ। भागाभ्यां। तिङ्‌तान्भ्यां। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानं। पचती
त्यत्रापि भागद्वयसत्त्वात्। साध्यसाधनरूपता यथाक्रमं ग्राह्या। साध्यत्वं क्रियान्तराकांक्षानुत्थापकतावच्छेदकरूप
वत्वं। साधनत्वं कारकत्वेनान्वयित्वं। सघञादिष्वपीति। प्रकृत्या साध्यावस्था प्रत्ययेन साधनावस्था। इयान्विशे
षः। घञाद्युपात्ता लिंगसंख्यान्वयिनी कारकान्वयिनी च। आख्यातोपात्ता तु नैवं। तथापि कारकान्वयित्वमात्रेण
दृष्टांतदार्ष्टांतिकत्वमवधेयं। न च घञन्ते धातुना तथाभिधाने मानाभावः। ओदनस्य पाक इति कर्मषष्ठ्या मा
नत्वात्। न चाध्याहृततिङन्तक्रियान्वयात् षष्ठी कर्तृकर्मणोः कृतीति सूत्रे तेन योगे एव तद्विधानात्। न लोकाव्यय
निष्ठाखलर्थतृनामिति लादेशयोगे षष्ठीनिषेधाच्च। एवं रीत्या काष्ठैः पाकः स्यादपीष्टमेव। एवं फलांशोऽपि धातु
नाऽसत्त्वावस्थापन्न एवोच्यते। अत एव स्तोकं पचतीतिवत्स्तोकं पाकः स्यादप्युपपद्यते।१५। एतदेव स्पष्टयति। सा
ध्यत्वेन क्रिया तत्र धातुरूपनिबंधना। सिद्धभावस्तु यस्तस्याः सघञादिनिबंधनः॥१५॥ न च घञादिभिः सिद्धत्वे

वै.भू.सा.
॥११॥

नाभिधानेमानाभावः। पाकइत्युक्ते भवतिनष्टोवेत्या[illegible]कांक्षोत्थानस्यैवमानत्वात्। धातूपस्थाप्यायां तदसंभवस्योक्तत्वा
त्। स्तोकः पाकइत्यादावनापत्तेश्च। तस्माद्धात्वर्थान्वयेस्तोकादिभ्यो द्वितीया घञर्थान्वये प्रथमा पुंल्लिंगता चेति नसिद्धयेघ
ञादेः कृतिरभ्युपेया। एतेन घञादीनां प्रयोगे साधुतामात्रमिति निपातिकनयोक्तमपास्तं। नच घञंत[illegible]पस्थाप्यान्वये
स्तोकः पाक इति भवतीतिवाच्यं। घञंतानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवात् तदनुशासनाच्च घञादेरेव तथा शक्तिकल्पनादिति
दिक्। एवं च घञन्तत्वमभिप्रायेण कृदभिहितो भाव इति भाष्यमतो न तद्विरोध इति भावः। ननु कारकाणां भावनान्वयनियमे एव
पाक इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनायां वाच्यत्वं [illegible] सिध्येत। मैवं कुत इत्यत आह। कां [illegible] समाधत्ते। संबोधनांतं इत्योर्थः का
रकं प्रथमोवति। धातुसंबंधाधिकारे निष्पन्नस्य सत्त्वस्य तत्वं ॥१८॥ संबोधनांतस्य क्रियायामन्वयः। संशृणु हि देवदत्त त्यादौ ति
घातानुरोधात्। समानवाक्ये [illegible]निघातयुष्मदस्मदादेशा इत्यनेन समानवाक्ये एव तन्नियमात्। उक्तं च वाक्यपदीये। संबो
धनपदं यच्च तत्क्रियाया विशेषणं। व्रजानि देवदत्ते[illegible] निघातो न तथा सति॥ इति। पचति भवति देवदत्तेत्यादौ तु सूत्रभाष्या
दिरीत्यैकवाक्यत्वसत्त्वात्स्यादेव निघातः। तिङ्ङतिङ इति सूत्रे यत्ता तिङ्। तानामप्येकवाक्यतास्वीकारात्। एकतिङ् वाक्य
मिति वदतां वार्तिककाराणां मते परं नायं स्तुत एकतिङ् विशेष्यकं वाक्यमिति तदभिप्रायस्यैव। आराजीयादौ वै[illegible]क

(margin) न्नत
(margin) ति
(margin) या

र्भक्षणे चास्माभिः प्रतिपादितत्वात्तन्मते षिभयत्वेवेत्यवधेयं वृत्तोर्थाः। क्रियाभ्यावृत्तिगणने कृत्वसुजिति क्रियायो
गे तत्साधुत्वोक्तेः। क्रियाया अभ्यावृत्तिः पुनः पुनर्जन्म तस्मिन्द्योत्ये र्थात्। कारकं कारके इत्यधिकृत्य तेषां व्युत्पादनात्
कारकशब्दो हि क्रियापरः। करोतीति कर्तृकर्मव्यपदेशानिति व्युत्पत्तेः। तथा चाग्रिमेषु अपादानादिसंज्ञाविधिषु क्रियार्थ
ककारकशब्दानुवृत्त्या क्रियान्वयिनामेवापादानादिसंज्ञेति भाष्ये स्पष्टा प्रथमावृत्तिः। तेन तुल्यं क्रियाचेद्वतिरिति विहितः
तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्। धातुसंबन्धाधिकारो धातुसंबन्धे प्रत्यया इत्यधिकृत्य तेषां विधानात्। असमस्तन
ञः समासायोग्यः। [illegible] असत्त्वप्रतिषेधो योनञित्यर्थः। उत्तरपदार्थान्वयेपि समासविकल्पेन पक्षे समस्तत्वा
प्रथाश्रुतग्रहणायोगात्। नचासमस्तनञः क्रियान्वयेमानाभावः न त्वं पचसि न युवां पचथः चैत्रो न पचति घटो न
ज्ञायते रूपादौ क्रियाया एव निषेध्यप्रतीतेः अत एव विद्यमानेपि घटे तथा प्रयोगः तथा च भूतलेन घट इत्यत्राप्य
स्तीत्यध्याहार्यो प्रकारता संबन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावे प्रसिद्धेः तेहेतु स्वस्य कृत्सत्त्वात्। शेषं नञर्थ
निर्णये वक्ष्यते। १८। तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयं साधुत्वप्रयोजकस्यापि क्रियये वावध्यायी। १७। तथा
तो
तथा च घटो नास्तीत्यत्रापि अस्तिता भाव एव बोध्यते।। न हि घटो न ज्ञायते नास्तीत्यनयोर्धीत्वर्थमंतरेणास्ति

ण

दि

तो

23

।१५।

यस्य च भावेन भावलक्षणमित्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वान्वाख्यानलाभात् । षष्ठी चानादरे इति न
द्[illegible] कारा घस्य च भावेनेत्यायातीत्यर्थः । साधुत्वमिति । तत्स्वरूपं तु वक्ष्यते । क्रियायेवेति । अयं भावः
[illegible] स्त्र्यादिषु प्रायः क्रियाशब्देन भावनाव्यपदेशात्तत्र तस्य सांकेतिकी रूढिः फलांशे काचित्कः क्रियते
इति यौगिकः प्रयोगः तथा च संज्ञाशब्दस्यानपेक्ष्यप्रवृत्तत्वेन फलवत्ता भावनान्वये एव साधुता लभ्यते । अत
एवं संज्ञाशब्दप्राबल्यादर्थान्तरमुत्तरग्रन्थपठितस्य स्वेवगेयं न तु वेदे तदुत्तरपठ्यमानस्य क्षित्तिनवमे निर्णीतं
किंच फलांशेऽपि भावनायां विशेषणकारकाण्यपि कचित्तथाभूतानीति गुणानां परार्थत्वादसंबन्धः समस्ता
स्यादिति न्यायेन सर्वैरेव कारकैरन्वीयं भावनायामेव परस्परनिरपेक्षाण्यन्वयन्ति । न हि भिक्षुको भिक्षुकान्त
रप्याचितुमर्हति । सत्यन्यस्मिन्न भिक्षुके दातरि इति न्यायेनापि फलस्य का भावनायामेवान्वियन्ति इति मीमांस
का अपि मन्यन्ते । एवं च विशेष्यतया कारकादिप्रकारकान्वयबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुरिति
कार्यकारणभावस्य कृप्तत्वात् । पक्षेऽपि पाचकरसादो भावनागुणभूतानन्त्रापि कृत्स्य कार्यकारणभा

वानुरोधात्। तस्यामेवान्वयरूपस्वसीयत्वेरूपसादिभूषणे प्रपंचितं। केचित्तु भूतले घटः देवदत्तो घट मित्यादावन्व
यबोधाकांक्षानिवृत्योरदर्शनान्नतत्त्वातिरिकेण साधुत्वलाभ इत्याहुः॥१७॥ स्वयमुपपत्तिमाह। यदिपक्षे
पिवस्त्वर्थः कारकंचनगादिषु। अन्वेतित्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना॥१८॥ पर्वतो वह्निमान्धूमान्महानस
वद्भूतलेन घटः भूतले घट इत्यादि पक्षान्तरे एवमादिष्वनुशासनविरोधेपि यदि साधुत्वमन्वयश्चाभ्युपेयते तर्हि
चतुर्थ्याः स्पृहिकल्पनापि त्यज्यतामित्यर्थः। अनुशासनानुरोधतो त्वेर्दृढतरत्वीयमयुक्तमिति भावः॥१८॥ एवं
च कर्त्रादौ विहितानां मित्यादीनां क्रियायैवान्वय इत्याहुः। अविग्रहागतादिस्वाश्रयथाग्रामादिकर्मभिः। क्रियाभिः
संबध्यते तद्वक्तपूर्वादिषु स्थिता॥१९॥ नविद्यते विग्रहो ग्रहणं यस्याः साऽविग्रहा गुणभूतेति यावत्। तथा च ग्रा
मं गतवानित्यत्र यथा। कृत्प्रत्ययार्थ गुणीभूतापि क्रिया ग्रामादिकर्मभिः संबध्यते तथा कृतपूर्वी कटमित्यत्रापि गु

भ॰सा
१२३५

पाभक्ताइत्यादिभिरित्यर्थः। नचवृत्तिमात्रेसमुदायशक्तेर्वक्ष्यमाणत्वात्तत्रांतर्गताभावनापदार्थैकदेशइतिकथंतत्रान्व
यइतिवाच्यं। नित्यसापेक्षस्यैकदेशेपिदेवदत्तस्यगुरुकुलंचैत्रस्यनप्तेत्यादाविवान्वयाभ्युपगमात्। एवंभोक्तुंपाकः भुक्त्वा
इत्यादावपिद्रष्टव्यं।१९। अतिप्रसंगमाशंक्यसमाधत्ते। क्त्वोर्थाः क्त्वातुमुन्वत्स्वितिचेत्सत्यंतिहिकेचित्। अतिप्रसंगोना
[illegible]व्योभिधानस्यसमाश्रयणात्। भोक्तुंपाकः भुक्त्वापाकइत्यादौतुमुन्ण्वुलौक्रियायांक्रियार्थायांसमानकर्तृकयोः
पूर्वकालइतिक्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकालेविधीयमानाअपितुमुनादयोगुणभूतांतामादाययथा
थातायंतेतथाक्त्वोर्थाअपि एकः पाकस्तत्रएकस्यसत्त्वे। द्वौपाकौत्रयश्चत्वारइत्यत्रद्वित्रिचतुर्भ्यः सुच् पंचेत्य
त्यत्रकृत्वसुच्स्यात्। तथाचसरलापाकः द्विस्त्रिश्चतुः पाकस्यावापत्तिरितिचेदिष्टापत्तिः द्विर्वचनमित्यादिदर्शनात्
अतिप्रसंगंतुनभिधानान्नेत्याह। नहिचचिरंतिपरः प्रयुज्यनरसायभियुक्तैरसमाधेयमितिभावः। केचित्तु
द्विःपाचकइत्याद्यापत्तिरित्यर्थः अतीति ५

[illegible]व

स्नु:

१

क्रियाभ्याख्यातिगणनद्वारेत्र क्रियापदं व्यर्थं तस्या एवाभ्याख्यातिसंभवेन सामर्थ्यात्तल्लाभात् । तथा च साध्यमात्रस्य भावक्रि-
यालाभाय तदिति वाच्यम् । तद्वपाकरणाद्दोत्तादृशीति नातिप्रसंगः । द्विर्वचनमित्यत्र द्विः प्रयोगो द्विर्वचनमिति व्युत्पत्त्या द्विर्वच-
नेऽपीति तात्पर्यकं वाक्यशेषोपपादनीयमित्याहुः ॥२०॥ ननु सिद्धान्ते बोधकत्ता शक्तिराख्यातशक्तिग्रहवत्तो बोधादावश्यकीति धा-
तोरेव भावनावाच्या नाख्यातस्येति कथं निर्णयः स्यादित्याशंकां समाधत्ते । भेद्यभेदकसंबंधोपाधिभेदनिबंधनं ॥ साधुत्वं तद-
भावे हि बोधो नेह निवार्यते ॥२१॥ भेद्यं विशेष्यं भेदकं विशेषणं तयोर्यः संबन्धस्तस्य यो भेदस्तन्निबंधनं साधुत्वं । अयमर्थः ॥
व्याकरणस्मृतिः शब्दसाधुत्वपरा तत्रैवावच्छेदकतयाकल्प्यधर्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमि-
त्येकमेवेति तच्छीला विचारे साधुत्वनिर्णय एव शक्तिनिर्णय उच्यते । अतिरिक्तशक्तिवादेप्याख्यातानां साधुता भावनाया-
एवं स्यादेव । [illegible] च चतुर्थ्यर्थे द्वितीया प्रयोगवद्वाच्यत्वर्थभावनायामाख्यातप्रयोगे या लोके सम्यक् साधुशब्दप्रयोगान्नान्तत्वे
ददितिविशेषोल्लंघनप्रयुक्तप्रायश्चित्तदर्शनान्तरीयव्युत्पत्तिमतां स्या[illegible]दे[illegible]वा । ननु तन्मतेनानन्तमिति निषेधः कृत्वर्थत्व[illegible]न

भ·सा·
॥१५॥

ऽसिध्येत्। आख्यातेन कर्तुरुक्तत्वात् पुरुषार्थतैव स्यात्। प्रकरणाद्धि क्रत्वर्थता तच्च श्रुतिविरोधे बाध्येत [illegible]तिचेन्न। तिङ-
र्थस्तु विशेषणमित्यनेनैव परिहृतत्वात्। न हि गुणभूतः कर्त्ता निषेधसंबंधयोग्यस्तेन ग्रहीतुमलं। भावनानु प्रधानेति ग्रहीतुं सम-
र्थेति प्रकरणात्क्रत्वर्थतैव अस्तु वा क्रतुयुक्तपुरुषधर्मः अनुष्ठाने विशेषाभावात्। जन्यमानो नु रूपान्मयि दक्ष क्र[illegible] नूद्
ति वाक्ययोरत्रैव विध्यवधिसादि भूषणे प्रपंचितं। नन्वाख्यातस्य भावनायामसाधुत्वे तत्तस्तद्बोधो न स्यात्। साधुत्वस्यान
स्य ज्ञानाद्बोधहेतुत्वादत आह। बोधक इति। असाधुत्वेपि साधुत्वभ्रमाद्बोधोस्तु नाम। अपभ्रंशेष्वत्र असाधुत्वं तु स्यादेवेति
भावः। वस्तुतः साधुत्वज्ञानं न हेतुः तद्व्यतिरेकनिर्णयोपि न प्रतिबंधकः। इत्यसाधुरनुमानेनेत्यत्र वक्ष्यामः॥ रंगोजि
भट्टपुत्रेण कौंडभट्टेन निर्मितः। पूर्णो भूषणसारेस्मिन्धात्वाख्यातार्थनिर्णयः॥ इति वैयाकरणभूषणसारे धात्वर्था-
ख्यातसामान्यार्थनिरूपणं समाप्तं। प्रत्येकं [illegible] लकाराणामर्थमाह। वर्त्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति। विध्या-
दौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥ १५॥ लडादयस्त्विति: षट्क्रमेणैतेष्वर्थेषु ज्ञेयाः। तथाहि वर्त्तमाने लट् [illegible] लिडिति॥

॥२२२८

वर्तमाने

लडादि

त्रात्। प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वं। पचतीत्यत्राधिश्रयणाद्यधिश्रयणान्तमध्ये तदस्तीति
भवति लट्प्रयोगः। आसते पर्वताः। सन्तीत्यादौ तात्कालिकराज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकेमादा
यवर्तमानत्वमूह्यं। उक्तं च भाष्ये। इह हि तत्तत्कालिकराज्ञां क्रिया तिष्ठतेरधिकरणमिति। परतोऽभिधत्ते सर्वमास्तां तु नवि
कल्प्यते। पर्वतादिस्थितिस्तु स्वमात्ररूपेण भिद्यते इति वाक्यपदीये च। एवं त्वमासीत्। तुच्छेनाभ्वपिहितं यदासीत्। अहमेकः प्र
थममासं वर्तामि भविष्यामि इति श्रुतयोऽपि योज्याः। न च वर्तमानत्वादि भिद्योत्यते क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां
लडादेस्तात्पर्यग्राहकत्वेनोपयोगात्। अन्वयव्यतिरेकाभ्यां तद्रूपे लडादिवाच्यमेव। अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरिति
विपक्षान्तरे। लिडर्थमाह। परोक्षे इति परोक्षे लिडिति सूत्रात्। कालस्तावदद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्
पः तत्रानद्यतने भूतेऽपरोक्षे लिडित्यर्थः। तेनाद्यतनभूतेऽनद्यतने भविष्यति भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वं च साक्षा
त्कारेऽमीलितादृग्विषयता ... नाविषयत्वं। न च क्रियाणां मेयमसत्त्वं तापरदृष्टापूर्वापरीभूता चयवानङ्गास्या निदर्शि

यितुमिति भाष्यात्तस्याऽतीन्द्रियत्वेन परोक्षेऽस्य व्यावर्तकमिति वाच्यं। पिण्डीभूताया निद्रा द्रष्टुमनुचितत्वेऽप्यवयववृत्तः सा
क्षेरोमीति प्रतीतिविषयत्वसंभवात्। अन्यथा पश्यन्नगो ध्यावतीत्यत्र तस्य दृष्टानेकर्मतानस्यादिति भाति। व्यापाराविशि
नां नुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः। अयं पपाचेत्यादावनुरोधाद्व्यापाराविशिष्टानामित्यल्पिवदं
ति। कथं तर्हि ध्यातेनेकिरणावली मुद्यनदृति स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत् असंगतमेव। व्यासंगादिना स्वव्यापारस्य
परोक्षत्वोपपादने विभ्रनघननातीनत्वयोरभावेन लिड्संभवात्। लुडर्थमाह। श्वोभाविन्यर्थ इति। अनद्यतने भावि [illegible] स
र्थः। अनद्यतने लुडिति सूत्रात्। यथा श्वो भवितेत्यादौ। लृडर्थमाह। भविष्यतीति। भविष्यत्सामान्येऽस्यार्थः। लृट् शेषे चेति सूत्रा
त्। यथा यक्ष्ये भविष्यतीत्यादौ। तत्र च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वं। लेडर्थमाह। विध्यादाविति। लिङर्थे ले
डिति सूत्रात्। लिङर्थश्च वक्ष्यते। लोडर्थमाह। प्रार्थनेति। आदिना विध्यामन्त्रणाद्युच्यते। आशिषि लिङ् लोटौ चेति सूत्राभ्यां त
था वगमात्। यथा भवतु ते शिवमस्त्वित्यादौ एतयोर्विध्योर्लिङर्थ एव त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः॥

क्षार क्रिया — प्रति — नी — विध्यादिरिति — या — लोटौ

लङादिक्रमेण ङितामर्थमाह। सोऽभूते प्रेरणादौ च भूतमात्रे सत्तां क्रियायापत्तौ च भूते भाविनि लृङ् स्यात॥२३॥ लङर्थमाह। सो

न अनद्यतने भूते इत्यर्थः। अद्यतने लङिति सूत्रात्। यथास्य पुत्रोऽभवत् इत्यादि। लिङर्थमाह। प्रेरणादाविति। विधिनिमंत्रणामंत्र

णाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रं। विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनं। निमंत्रणं नियोगकरणं आवश्यके प्रेरणे इत्यर्थः

आमंत्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता लाघवात्। उक्तं च। अस्ति

प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि। तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया। न्यायव्युत्पादनार्थं वा प्रपंचार्थमथापि वा। विध्यादी

नामुपादानं चतुर्णामादितः कृतमिति। प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं तच्चेष्टसाधनत्वस्यास्तीति तदेव

विध्यर्थः। यद्यप्येतत्त्वेऽतिसाध्यत्वस्यापि तज्ज्ञानस्य प्रवर्तकत्वात् तथापि यागादौ सर्वत्र तल्लोके तदेव गम्यते इत्यन्यलभ्यत्वान्न त

व च्छक्यं बलवदनिष्टाननुबंधित्वज्ञानं च न हेतुः द्वेषाभावेनान्यथासिद्धत्वात्। आस्तिककामुकस्य नरकसाधनताज्ञानदशाया

मप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च। तस्मादिष्टसाधनत्वमेव प्रवर्तना। उक्तं च मंडनमिश्रैः। पुंसां नेष्टाभ्युपायत्वा

स

31

क्रियास्वन्यः प्रवर्तकः ॥ प्रवृत्तिहेतुधर्मं प्रवदंति प्रवर्तनां इति । प्रपंचितं चैतद्वैयाकरणभूषणे । आदिना हेतुहेतुमतोर्लिङ् ।
आशिषि लिङ्लोटाविति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते यो ब्राह्मणायावगुरेत्तं शतेन यातयेदिति यथा । लुङ्
र्थमाह । भूतमात्र इति । भूतसामान्य इत्यर्थः । भूत इत्यधिकृत्य लुङिति सूत्रात् । अत्र विद्यमानध्वंसप्रतियोगि
त्वं भूतत्वं तच्च क्रियायां निर्बाध्यमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः । विद्यमानध्वंसप्रतियोगिघटा
भिन्नाश्रयकोत्पत्त्यनुकूलव्यापार इति बोध्यः । अयमत्र संग्रहः । कालो द्विविधः । अद्यतनोऽनद्यतनश्च । आ
द्यस्त्रिविधः । भूतभविष्यद्वर्तमानभेदात् । अंत्यो द्विविधः । भूतो भविष्यंश्च । तत्र वर्तमाने लट् । भूतमात्रे लुङ् । भ
विष्यत्तामात्रे लृट् । हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लिङ् । अनद्यतने भूतत्वेन विवक्षिते लङ् । तत्रैव प
रोक्षत्वविवक्षायां लिट् । नाहं तत्रो भविष्यामि लृट् इति द्रष्टव्यं । लृङर्थमाह । सत्तामिति । क्रि[illegible]तिपत्ति अनिष्प

पायाम

हे॰ क्रियातिपत्तौ इति सूत्रात्

हेतु

तिसृणां स्वांगम्यमानानां भूते भाविनि हेतुमद्भावे सति लृङ् इत्यर्थः लिङ्‌निमित्ते लृ[illegible]। लिङो निमित्तं हेतुहेतु
मद्भावादि। यथा सुवृष्टिश्चेद[भविष्यत्] सुभिक्षमभविष्यत्। यदि कृष्णोऽभोक्ष्यत ओदनमपक्ष्यत् इत्यादौ अत्र भ
न्हर भिन्नाश्रयकप्रसक्तेनानुकूलव्यापाराभावप्रयो॰ ओदनभिन्नाश्रयकविक्लित्यनुकूलव्यापाराभाव इत्यादि
र्सा क्रष्टव्यं। अयं चार्थनिर्देश उपलक्षणं अर्थान्तरेपि विशुद्धो विधानदर्शनात्। प्रसिद्धत्वादेवैवार्थपुरस्कृतिस्य
न्नलक्षणेति मतान्तरं प्रत्याचोक्तं। एतेषां क्रमनियामकश्चानुबन्धक्रम एव। अत एव पंचमो लकार इत्यनेन मीमांस
कैर्लेट् व्यवह्रियते इति दिक्। इति भूषणसारे लकारार्थविशेषनिरूपणं। सुबर्थमाह आश्रयो ऽवधिरुद्देश्यः सं
बंधः शक्तिरेव वा। यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥ २४॥ द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। त
था हि। कर्मणि द्वितीयेत्यत्र कर्तुरीप्सिततमं। क्रियाजन्यफलाश्रय इत्यर्थः क्रियाजन्यफलाश्रयत्वेन कर्मण एव

भविष्य

त्व

कर्तुरीप्सिततमत्वात्। तथा युक्तं वानीप्सितमित्यादि संग्रहश्लोकेऽयमेव युक्तं। ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन सं
ज्ञायामेव तदुपयोगो न तु वाच्यकोटौ तत्प्रवेशः तथा च क्रियायाः फलस्य च धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः तत्वं
चाखंडशक्तिरूपमवच्छेदकं। ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्मता। घटं करोतीत्यत्रोत्पत्त्याश्रयत्वात्। उत्पत्तेर्धात्वर्थत्वा
त्। जानातीत्यत्रावरणभंगरूपफलीधात्वर्थफलाश्रयत्वात्। अतीतानागतादिपरोक्षस्थलेपि ज्ञानजन्यस्य तस्यावश्यकत्वात् भिवु
अन्यथा यथापूर्वं न जानामीत्यापत्तेः अतीतादेराश्रयताच्च विषयतया ज्ञानाश्रयतायानेपाधिकान्तःसत्कार्यवादसिद्धां
ताद्धोपपद्यत इति। उक्तं च। तिरोभावाभ्युगमे भावानां सैव नास्तिता। लब्धक्रमे तिरोभावे नश्यतीति प्रतीयत इति। ननु चैत्रो ग्रा
मं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मतापत्तौ चैत्रश्चैत्रं गच्छतीति प्रतीत्याप
त्तिः प्रयागतः काशीं गच्छतीति चैत्रे प्रयागं गच्छतीत्यापत्तिश्च। क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयागेपि
सत्वादिति चेन्न। ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगा

संभवात्। द्वितीयोऽसत्तोऽसंस्थाया एव नियामकत्वात्। अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णेने
त्यत्रापि कृष्णपदाद्द्वितीयापत्तेः। शाब्दबोधश्चैत्रश्चैत्रमित्यत्र स्यादिति चेन्न। तथा सुसमानाभिष्टापत्तेः। उच्यतां वा
प्रकारता संबन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारण
भावान्तरं। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः प्रयागस्य कर्मत्वं तु संभावितमपि न। समभिव्याहृतधा
त्वर्थफलशालित्वस्य क्रियाजन्येऽलनेन विवक्षणस्योक्तप्रायत्वात्। नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वं द्वि
तीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयायाश्चामुपाददते। परसमवेतत्वं धात्वर्थक्रियाया
मन्वेति। तथैव कार्यकारणभावान्तरकल्पनात्। परत्वमपि द्वितीयायास्य प्रकृत्यर्थापेक्षया बोध्यते तथा च चैत्रस्तंडु
लं पचतीत्यादौ तंडुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात् तंडुलानां कर्मता। शाब्दबोधस्तु तं
डुल[illegible]समवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतंडुलान्यसमवेतक्रियाजनकस्त्रिमां श्चैत्र इति बोधः स्यादिति। तन्न

शेच्चयामहे॥ परसमवेतत्वादगौरवेण वाच्यत्वात्। अतिप्रसंगः किं द्वितीयायाः शाब्दबोधस्य वा॥ नाद्यः। त्तावद्भाव्य
कथनेपि तत्तादवस्थ्यात्॥ गमयति स्वं गोकुलमितिवत्पाचयति सूपं गोपदस्यापत्तेः तंडुलं पचतीत्येव तद्वत्तिवत्तं
डुलं पच्यते स्वयमेवेत्यापत्तेश्च। विक्लित्त्यनुकूलतंडुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात्। शाब्दबोधातिप्रसं
गोप्युक्तरीत्यैव निरस्तः। परसमवेतत्वस्य शाक्यत्वेपि परत्वस्य परसमवेतत्वस्य चेष्टान्वयित्वाभावायानेकताः कार्यका
रणभावाभ्युपगमे गौरवतरत्वात्॥ इति स्पष्टं भूषणे। एतच्च सप्तविधं निर्वर्त्यं च विकार्यं प्राप्यं चेति त्रिधा मतं। तच्चे
।प्सिततमं कर्म चतुर्द्धान्यत्तु कल्पितं। औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं। संज्ञांतरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकं
मिति वाक्यपदीयात्। यदसज्जायते सद्वा जन्मना यत्प्रकाश्यते तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितं। प्रकृत्युच्छेदसंभू
तं किंचित्काष्ठादिभस्मवत्। किंचिद्गुणांतरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते॥
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते॥ इति च। तत्रेमोक्तः। घटं करोतीत्यादौ। काष्ठं भस्म करोति। कुंडलं करोतीति द्विती

त च वासुदेव

सा सुवर्णं

त्यु

यं। घटं पश्यतीति तृतीयं। तृणं स्पृशतीत्यौदासीन्यं। विषं भुंक्ते इति द्वेष्यं गां दोग्धि पय इति संप्रदानेष्वनाख्यातं। कूरमभिक्षु
न्य ध्यतीत्यर्थपूर्वं। कर्तृतृतीयाया आश्रयोऽर्थः। तथा हि। स्वतंत्रः कर्ता। स्वातंत्र्यं च धात्वर्थव्यापाराश्रयत्वं धातुनोक्तक्रियेति स्वं यदा
संकारके कर्तृत्वेष्यते इति वाक्यपदीयात्। अत एव यदीयो व्यापारो धातुनाभिधीयते तदा स कर्तेति स्थाली पचति एधाः प
चंतीत्युक्तः। पच्यते स्वयमेवेत्यादि[illegible]तो। न चैवं कर्मकर्तृव्यपदेशाच्चेति सूत्रे मनोमयः प्राणशरीर इति वाक्यस्थ म
नोमयस्य जीववृत्तित्वे वाक्यशेषे तत्र सत्यमितः प्रेत्याभिसंभवितास्मीति प्राप्तिकर्मकर्तृत्वव्यपदेशो विरुद्ध इति भगवता
व्यासेन निर्णीतं कथं संगच्छते। उच्यते। जीवस्यैव सत्यत्वे प्राप्तिकर्मत्वमपि वाच्यं कर्तृत्वं च तत्स्याख्याते नोक्तं। न चैवं
कदा संस्तोद्धयं युक्तं। तथा चैतन्मिति द्वितीया न स्यात् कर्मकर्तृतायां च यगात्मनेपदे इति शब्दविरोधद्वारा भवति सम
दहेतुः। एवं च व्यापाराश्रयत्वस्य धात्वलभ्यत्वादाश्रयमात्रं तृतीयार्थः। कारकं च प्रयोक्तृत्वं स्वाश्रयत्वं वा दंडः करोतीत्य
त्रातिव्याप्तं। अयं च त्रिविधः। शुद्धः प्रयोजकहेतुः कर्मकर्ता च। मया हरिः सेव्यते। कार्यते हरिणा। गमयति स्वं गोकु
लं। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः हर्यभिन्नाश्रयकोत्पादनानुकूलो व्यापारः गोकुलकर्मकगमना

॥वै॰भू॰सा॰
॥१९॥

२

नुकूलत्वञ्चाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः। करणतृतीयायास्त्वाश्रयव्यापारोर्थो यथाहि साधकतमं
करणं तमबर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्यापारवत्ता तादृशव्यापारे कारणं च करणं उक्तं च वाक्यपदीये क्रिया
याः परिनिष्पत्तिर्यद्व्यापारादनन्तरं विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतं। वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं न
के स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः। अनेन सहकारिणां तदभावात् तृतीया सम्पादकत्व कार्यं सूचयति। न
चैवं कर्तृशास्त्रार्थवत्त्वादिसु...रमीमांसाधिकरणे शक्तिविपर्ययादिति सूत्रेण ततः करणस्य कर्तृत्वे करणशक्ति
विपर्ययापत्तिरुक्ता न युज्यते ... तदेतेषां प्रमाणानां विलाने न विलानमादाये ति श्रुत्यन्तरे करणतयाक्लृप्तस्य कर्तृ वा
तांप्रकल्प्य शक्तिविपर्ययापत्तिः ...प्रमाणाकल्प्येत्यभिप्रायात् वस्तुतस्तु ...यमात्रमेतदिति यथा च तत्रोभयथेस
धिकरणे भाष्य एव स्पष्टमिति ...प्रपञ्चितं भूषणे। सप्तम्या अप्याश्रयोर्थः सप्तम्यधिकरणे चेत्यधिकरणेस ...
तत्राधारोऽधिकरणमिति सूत्रे ...दाधारः तत्त्वं चाश्रयत्वं तत्राश्रय... शः शस्यः तत्त्वमवच्छेदकं। न चाश्रयत्वमात्रेण क वासुदेव
र्तृकर्मकरणानामप्याधारसंज्ञा स्यात् ...स्या...देच यदि ताभिरस्या बाधो न स्यात् कारके इत्यधिकृत्य विहिता सप्तम्याः क्रि

१८

त

आश्रयस्यैव यद्यपि तावत्सर्वत्र तथाप्य- कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति स्थाल्यां पचति भूतले
वसति कटे शेते इत्साधूपपद्यते। उक्तं च वाक्यपदीये। कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां। उपकुर्वत्क्रियासिद्धौ शा
स्त्रेऽधिकरणं मतं। एतच्च त्रिविधं। औपश्लेषिकं वैषयिकं अभिव्यापकं चेति। कटे शेते गुरौ वसति मोक्षे इच्छास्ति तिलेषु तैल
मिति। एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं। अवधिः पञ्चम्यर्थः अपादाने पञ्चमी। तच्च ध्रुवमपायेऽपादानमिति सूत्रा
त्। अपायो विश्लेषस्तज्जनकक्रिया तत्रावधिभूतमपादानमित्यर्थकात्। अवधिभूतमिति भावः। उक्तं च वाक्यपदीये
अपाये यदुदासीनं चलं वा यदि वाचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते। पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
द
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते। उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे। विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थि
ते। मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् इति। अस्यार्थः अपाये विश्ले
षहेतुक्रियायां उदासीनमनाश्रयः अतदावेशात्। तत्क्रियानाश्रयत्वात्। एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्ले

॥वै॰भू॰सा॰
॥२०॥

पाश्रयत्वं फलितं। वृक्षात्पर्णं पततीत्यादौ पर्णस्य तद्धारणाय ससंतं धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषो हि इति
कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेपि तत्र विरुद्धमित्याह। यस्मादश्वादिति। तद्विश्लेषहेतुक्रियानाश्रय
त्वे सतीति विशेषणीयमिति भावः। एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह। तस्यापीति। उभयकर्मजविभा
गस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परान्मेषावपसरेते इति न स्यादित्याशंक्य समाधत्ते। उभाव
पीति। मेषान्तरस्ति। यथा निश्चलमेषादपसरे द्वितीयमेषस्थले निश्चलमेषस्यापसर[illegible]श्लेषक्रियामादाय ध्रुवत्वं। तथात्रापि वि
नृ भागैक्येपि क्रियाभेदादेकक्रियामादायाप[illegible]रस्य ध्रुवत्वमिति। तत्राच विश्लेषाश्रयत्वे सतीति तज्जनकतत्क्रियानाश्रयत्वं त
क्रियायामपादानत्वं भाव्यं। क्रियामात्रं धात्वर्थो न तु स्पंदः। तेन वृक्षकर्मतविभागवति वस्त्रे वृक्षाद्वस्त्रं पततीति संगच्छते। व
स्तुतो नैतावत्त्वं च भ्यावाच्यं किंतु अवधेर्लक्षणमात्रं। द्वितीयार्थे कर्तृत्वाप्रयोगात्ति प्रसंगस्यासंभवेन वाच्यकोटिप्रवेशस्य
गौरवेणासंभवादिति तु भाति। न चैवमपि वृक्षात्स्पंदते इति स्यादिति वाच्यं। आसनाच्चलितः आस[illegible]चलितः इत्या

वासुदेव

प्रति भा २०

उक्तिर

त्तिवद्दिष्टापत्तेः। एतेन पंचमीजन्यापादानत्वबोधेस्य कर्मकध्यातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः। नैवं
वमपि चक्षास्तजतीतिदुर्वारं। कर्मसंज्ञया पादानसंज्ञाया बाधेन पंचम्यसंभवात्॥ भ्रममात्रत्वे तु तथा प्रयोगे यदि बोधाभा
वोऽनुभवसिद्धस्तर्हि पंचमीजन्यापादानत्वबोधेस्याऽस्यादिभिन्नध्यातुजन्यबुद्धेर्हेतुत्वं बोध्यं। बलाहकाद्विद्योतते इत्यादौ निस्स
त्येत्यध्याहार्यं रूपं रसात्पृथगित्यत्र बुद्धिकृतमपादानत्वं दृष्टव्यं। पृथग्विनेति पंचमी वा। इदं चानिर्दिष्टविषयं किंचिदुपा
त्तविषयं तथा। अपेक्षितक्रियं चे। ति त्रिधापादानमुच्यते इति वाक्यपदीया त्रिविधं। यत्र साक्षाद्धातुना गतिर्निर्दिश्यते त
तन्निर्दिष्टविषयं। यथाश्वात्पततीति। यत्र धात्वन्तरार्थांगं स्वार्थं धातुराह तदुपात्तविषयं। यथा बलाहकाद्विद्योतते। निः
सरणांगे विद्योतने द्युतिर्वर्तते। अपेक्षिता क्रिया यत्र तदुत्से। यथा कुतो भवान् पाटलिपुत्रात्। अत्रागमनमर्थमध्याहृ
त्यान्वयः कार्यः। 13 देत्यश्चतुर्थ्यर्थः तथाहि। संप्रदाने चतुर्थी। तच्च कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रात्कर्म
णाकरणभूतेन यमभिप्रैति इच्छति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यं इदमेव शेषित्वं तदुद्देश्यकेच्छाविषयत्वं शेष

त्वमितिपूर्वोक्तंनेनिरूपितं। अत एव प्रासनवन्मैत्रावरुणाय दण्डप्रदानमित्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्ड[illegible]दानं न प्रतिपत्तिः। किंतु चतुर्थीश्रुत्यार्थकर्मेति तत्र निर्णीतं। रजकाय वस्त्रं ददातीत्यपि खंडिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्योदाहरणाद्दृष्टमेव। वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्येवाहुः। इदं चानिराकरणात्कर्तुस्स्वागांगं कर्मणोप्सितं। प्रेरणानुमतिभ्यां च लभन्ते संप्रदानतां। इति वाक्यपदीयात्त्रिविधं। सूर्यायार्घ्यं ददातीत्याद्यं। नात्र सूर्यः प्रार्थयति नानुमन्यते न निराकरोति। प्रेरके विप्राय गां ददाति। अनुमितौ उपाध्यायाय गां ददाति। अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः। विभक्तीनां धर्मिवाचकत्वात्। धर्ममात्रवाचकत्वे कर्मणि द्वितीयेति सूत्रस्वरसभंगापत्तेः। कर्मार्थत्वे तद्धितादौ तथा दर्शनाच्च द्वितीयाद्यर्थकबहुव्रीहौ प्राप्तोदको ग्राम इत्यादौ धर्मवाचकतालाभाच्च। सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां। इति भाष्याच्चेति दिक्॥ आश्रयस्यापि प्रत्ययेनैव लाभात्

ते

वाच्यं विभक्तिवाच्यता। किंत्वाश्रयमात्रं न देवचतादात्म्येनावच्छेदकं करणत्वं तृतीयाया आश्रयव्यापारोऽपि पंचम्या विभागमात्रं
चतुर्थ्या उद्देश्यत्वमात्रं। अत एवाधाराधिकरणमपि न विरुध्यते इत्यभिप्रेत्याह। शक्तिरेव वेति। षष्ठ्यामपीति शेषः।
शेषषष्ठीति सूत्रात्तस्याः संबंधमात्रं वाच्यं। कारकषष्ठ्यास्तु शक्तिरेवेत्यर्थः। सप्तमीपंचम्यौ कारकमध्ये इति सूत्रे श
क्तिः कारकमिति पक्षस्य भाष्ये दर्शनात्। एवं च देवदत्तस्य गौर्ब्राह्मणाय गंगायां हस्तेन मया दीयते इत्यत्र देवद
त्तसंबंधिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गंगाधिकरणको
हस्तकरणो मन्निष्ठो व्यापार इति बोधः। यथायथमुक्तप्रकारेण। अत्र मानमुपदर्शयन्नाह। घटं जानातीत्यादौ द्विती
याविषयताया लक्षणेति वदतो नैयायिकादीन्प्रत्याह। सुपां कर्मेति। अयं भावः। सुपां कर्मादयोऽप्यर्थाः सं
मा ख्याश्चैव तथा तिङां। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वेति वार्तिके तद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियम
हि स्य च लाभः। तथा स्वौजसमौट् कर्मणि द्वितीया द्व्येकयोर्द्विवचनैकवचने इत्यादेः लस्य तिप्तस्झि तान्येकय

43

वै·भू·सा·
११२५

चनद्विवचनेस्यादिरेकवाक्यतया कर्मादेस्तत्संख्यायाश्चवाच्यतालभ्यतेतथात्तन्नियमश्चविधिर्लभ्यते द्वितीयाकर्म
ण्येवतृतीयाकरणएवेत्येवमादिरर्थनियमः कर्मणिद्वितीयेवकरणेतृतीयेवेत्यादिशब्दनियमश्च। उभयथापिसिद्ध
नियमविरुद्धंलक्षणादिकमसाधुत्वप्रयोजकमितिप्राक्कर्मणिनान्तरंवदेदितिनिषेधविषयोभवत्येतिस्वार्थायाल
क्षणादिविभक्तावप्रयोजिकेव। अतएवविभक्तौनलक्षणेत्यादिनेष्याधिकरद्धानां व्यवहारइतिदिक्। इतिवैयाकर
णभूषणसारेसुबर्थनिर्णयः समाप्तः। नामार्थानाह। एकंद्विकंत्रिकंचाथचतुष्कंपंचकंतथा। नामार्थइतिसर्वेमी
पक्षाः शास्त्रेनिरूपिताः॥२५॥ एकंजातिः। लाघवेनतस्याएववाच्यत्वोचितत्वात्। अनेकव्यक्तीनांवाच्यत्वेगौरवात्
नच व्यक्तीनामपिप्रत्येकमेकत्वाद्विनिगमनाविरहः। एवंहिएकस्यामेवव्यक्तौशक्त्यभ्युपगमेव्यक्त्यन्तरेलक्षणायां
स्वसमवेतत्वाश्रयत्वंसंसर्गइतिगौरवं। जात्यातुसहाश्रयत्वमेवसंसर्गइतिलाघवात्। किंचैवंविशिष्टवाच्यत्वमपे
क्ष्यनागृहीतशक्तिविशेषणान्यायाज्जातिरेववाच्येतियुक्तं। व्यक्तिबोधस्तुलक्षणया। एवंचतत्रविभक्त्यर्थान्वयो

पि

१२२५

स्युपपद्यतइति दिक्॥ यद्वा केवलव्यतिरेक्येकमूद्धार्थः। केवलव्यतिपक्ष एवाण्ग्रहणं स्यैकशेषस्याचारंभेणतस्यापिशा
स्त्रसिद्धत्वात्॥ युक्तंचैतत्। व्यवहारेणव्यक्तावेवतद्ग्रहणात् संबंधितावच्छेदकस्यजातेरेवव्यावर्तिरेकेवेतिनगौर
वमपि। नचैवंघटत्वमपिवाच्यंस्यात्॥ शक्यतावच्छेदकत्वात्तथाचनागृहीतविशेषणन्यायात्तदेववाच्यमस्त्विति
शंक्यं। अकारणत्वेपिकारणतावच्छेदकत्ववदलक्ष्यत्वेपिलक्ष्यतावच्छेदकत्ववत्तथापिसंभवात्॥ उक्तंच। आनंत्येपि
हि भावानामेकंकृत्वोपलक्षणं। शब्दः सुकरसंबंधोनचव्यभिचरिष्यतीति॥ वस्तुतस्तु नह्याकृतिपदार्थकस्यद्रव्यंन
पदार्थइतिभाष्यादिविरोधेवा स्य एकस्मिंस्तस्य चायमर्थः शक्तिज्ञानेविषयतयावच्छेदिका जातिरेव। तथाचघ
टत्वविशिष्टबोधेघटत्वांशे अन्याप्रकारकेशक्तिज्ञानत्वेनहेतुतेति कार्यकारणभावरसादिप्रपंचितंभूषणे॥
तदेतदभिप्रेत्याह। द्व्येकमिति। जातिव्यक्ती इत्यर्थः। त्रिकमिति। जातिव्यक्तिलिंगानीत्यर्थः। सत्वरजस्तमोगुणा
नांसाम्यावस्थानपुंसकत्वं। आधिक्यंपुंस्त्वं। अपचयस्त्रीत्वं। तत्तच्छब्दनिष्ठंतद्वाच्यंचातमेवविरुद्धधर्ममा

घटत्व

यै·मू·सा
११२३५

दायतत्वादिशब्दमभिधत्ते। केषांचिदनेकलिंगव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवं च पदार्थपदं पुं
स्त्वमेव व्यक्तिपदे स्त्रीत्वमेव वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थः इयं व्यक्तिः इदं वस्त्विति व्यवहारः तट
स्तटी तटमिति चोपपद्यते। तत्र लिंगमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दो कपशु स्त्रियां नास्तीति पशुने
त्यादि विधिर्नच्छाग्यादानेगात्वेन प्रयोजयतीति विभावनीयं। न च व्यक्तस्यापि शब्दो कलिंगस्यैव पश्वादिशब्दो तस्यापि सा
धारण्यमुक्तं यथा। व्यक्तिशब्दस्य नित्यस्त्रीलिंगत्वेन तथा संभवेपि पशुशब्दस्य नित्यपुल्लिंगत्वे प्रमाणाभावात्। पश्वा
नतायुरुक्तं च रतं पश्वेन प्शोयथागवेत्यादिवेदेदर्शनाच्च। मीमांसायां चतुर्थ पशुना यजेतेत्येकत्वपुंस्त्वयोर्विवक्षि
तत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च। वस्तुतस्तु विशेषविध्यभावेषु प्रसज्यतानां पुंस्त्व
स्य व्याकरणे निर्णीतत्वादेवद्भाष्यपिजसादिपुंच्छदसिवाबन्नेइतिनाभावाभावरस्तु कैः पशुशब्दस्यानित्यपुंस्त्वस्य
ति निर्णयात्। प्रकृते च्छागो वा मंत्रवर्णादिन्यायेनैव निर्णयः मंत्रवर्णे हि च्छागस्य वपाया मेदस इति श्रूयते तत्त्वच्छाग

गस्येति ध्वाग्या[illegible]मसंभावितमिति भवति । ततः पुंस्त्वनिर्णय इति प्रपंचितं भूषणे । चतुष्कं । संख्यासहितं त्रिकमित्यर्थः
[illegible] पंचकं । कारकसहितं चतुष्कमित्यर्थः । नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यत्वं तत एव लिंगा
दीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति सत्यं । प्रत्ययवर्जिते दधिमधु इत्यादौ प्रत्ययमजानतोपि बोधात्प्रकृतेरे
व वाचकत्वं कल्प्यते लिंगानुशासनस्य प्रकृतेरेव दर्शनाच्च । अत एवैषु पक्षेषु न निर्बंधः । प्रत्ययस्यैव वाचकतायां युक्त्वा
तः द्योतका वाचकास्तु द्वित्वादीनां विभक्तय इति वाक्यपदीयेपि पक्षद्वयस्य व्युत्पादनात् । शा[illegible]ति । बहुषु स्थलेषु यु
स्वादनं व्यंजयितुं प्राधान्येन स्वरूपस्य नादो व्यक्तः । शब्दस्त्वावच्छादबोधे भासते । न सोस्ति प्रत्ययो लोके यः शब्दानु
गमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते इत्यानुभविकोक्तेः । विष्णु[illegible]मुच्चारयेत्यादावर्थोच्चारणासंभवेनपि
ना शाब्दविषयं शाब्दबोधासंगतिश्चेति सोपि प्रातिपदिकार्थः । न च लक्षणया निर्वाहः । निरूढलक्षणायाः शा
त्स्यानतिरेकात् । जबगडदशमुच्चारयेत्यादौ शास्त्रग्रहेण शक्यसंबंधरूपलक्षणया अग्रहाच्च । अज्ञातायाश्च वृत्ते

रनुपयोगात्॥ गागस्सुधारयेत्यादिभाषाशब्दानामनुकरणे साधुत्वाप्रतिपत्तेस्तेषां शब्दत्वभावेन परनये लक्षणाया असंभवात्प्रेस
मिप्रेत्यतो हापि प्रातिपदिकार्थ इत्याह। शब्दोपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेच्छ्रोत्रादिभिः सिद्धोप्यसावर्थोऽवभासते॥२६॥
यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोपि प्रातिपदिकार्थः यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोप्यर्थ एव भासते। अ
पि हेतो। उपस्थितत्वाद्भासत इत्यर्थः। अयं भावः। अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदादनुपस्थितत्वात्तत्सिद्धये शक्तिरूपे
या। अभेदपक्षे विषयस्य हेतुत्वात्। स्वप्रत्यक्षारूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति। यद्यपि प्रसंगा
पदे वारणाय वृत्तिजन्योपस्थितेरेव हेतुः तथाप्युक्ताश्रयतत्पार्श्व इति मत्वा सत्त्वाभानुपपत्तिः निरूपकता श्रयतान्यतरसंबंधेन वृ
त्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यः। संबंधस्योभयनिरूप्यत्वात्। पदार्थस्यैव तद्बोधकत्वेन स्वस्यापि सत्तान संभवात्त्व
ति॰ उक्तं च वाक्यपदीये। ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा। तथैव सर्वशब्दानामेते पृथगवस्थिते इति। विषयत्वमनाद
स्य शब्दैर्नार्थः प्रकाश्यते इति चेति।२६। प्रसंगादनुकार्यानुकरणयोरभेदपक्षे साधकमाह। अत एव गावित्याह भूसत्तायामिती
त्थं। न प्रातिपदिकं नापि पदं साधुत्वसत्स्मृते।२७। गावित्ययमाह भूसत्तायामित्येवमादयोऽनुकरणशब्दा अनुकार्यान्नभिद्यते॥

अनस्तेषामर्थवत्त्वाद्यभावादर्थवद्धातुरित्याद्यप्रवृत्तौ न पदत्वेन वा प्रातिपदिकत्वे । अथ च साधुत्वमप्युपपद्यते अन्यथा प्रत्ययः पर

श्च अपदं न प्रयुञ्जीतेति निषेधाद्द्विजघनादसाधुतापत्तिरित्यर्थः ।२७। इति वै. भू. सा. नामार्थनिर्णयः । समासान्विभजते । सुपां सुपा

तिङा नाम्ना धातुनाथ तिङां तिङा । सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ।२८। सुपां सुपा । पदद्वयं सुबन्तं । राजपुरुष इत्यादिः ।१

सुपां तिङा । पूर्वपदं सुबन्तं । उत्तरं तिङन्तं । पर्यभूषयत् । अनुव्यचलत् । गतिमतोदात्तवता तिङापि समास इति वार्तिकात्समासः

सुपां नाम्ना । कुम्भकार इत्यादिः ।३ उपपदमतिङिति समासः । स च गतिकारकोपपदानां कृद्भिः सह समासवचने प्राक् सुबुत्पत्तेरिति

परिभाषया भवति सुबुत्पत्तेः प्राक् । अन्यत्रोत्तरं सुबुत्पत्तेः प्रागिति स्वर्थात् । अन्यथा चर्मक्रीतीत्यादौ नलोपानापत्तेः । सुपां धातुना । उत्तर

पदं धातुमात्रं । न सुप्तिङन्तं । कटप्रूः । आयतस्तूः । क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति वार्तिकात् । तिङां तिङा । पिबत

खादता पचत भृज्जता इत्यादिः । आख्यातमाख्यातेन क्रियासातत्ये इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । तिङां सुबन्तेन । पूर्वपदं तिङन्तं

उत्तरपदं सुबन्तं । जहिस्तम्बः । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधातीति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । अयं षड्विधोऽपि समासः

सह सुपेत्यत्र योगविभागेन भाष्ये युक्तादितः स्पष्टं चेदं कौस्तुभादौ ।२८। स्वयं भाष्यादिसिद्धं तद्भेदं युक्ताद्य प्राचीनवैयाकरणोक्तवि

पदे
ध्या

सु

मपि
मि
ति

भागस्याव्याप्त्य तिव्या त्याप्त्यादिभिस्तल्लक्षणस्याप्राथिकत्वं दर्शयति। समासस्तु चतुर्द्धेति प्रायोवादस्तथापरः। योयं पूर्वपदार्थादिप्राधा
न्यविषयः सचार२१। भोतपु र्व्यात्सो पिरेखागवयादिवदारस्थितः। चतुर्द्धा अव्ययीभावतत्पुरुषद्वंद्वबहुव्रीहिभेदात्। अयं प्रायोवादः।
भूतपूर्वः इन्भूः कारभूः औचनस्तुः यागर्था विवेसाय संग्रहात्। तथा पूर्वपदार्थप्रधानो व्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उ
भयपदार्थप्रधानो द्वंद्वः अन्यपदार्थप्रधानो बहुव्रीहिरित्यादिलक्षणं प्रायिकं। उन्मत्तगंगं सूपप्रति। अर्द्धपिप्पली। द्वित्राः ग्रूग्राकुग्रूपलाग्रूमि
त्यादौ परस्परं व्यभिचारात्। तथाहि उन्मत्तगंगं सव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः अन्यपदार्थप्राधान्या [illegible] द्व
हुव्रीहिलक्षणेऽव्याप्तिश्च। अन्यपदार्थे च संज्ञायामिति समासात्। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणाति
व्याप्तिरव्ययीभावलक्षणाव्याप्तिश्च। सुप्रतिनामात्रार्थे इति समासात्। अर्द्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्वादव्ययीभा
वातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च। अर्द्धं नपुंसकमिति समासोक्तेः। एवं पूर्वकायः इत्यादौ द्रष्टव्यं। द्वित्रा इति बहुव्रीहौ उभयपदार्थप्राधान्याद्द्वं
द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च ग्रूग्राकुग्रूपला ग्रूमित्यादि द्वंद्वसमासे न्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वंद्वाव्याप्तिश्चेत्यादि
तिभावः। सिद्धांते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यं। असंभवश्चैषामित्याह। भोतपु र्व्यादिति रेखागवया
सा

रेखागवयवदेव। यथा रेखागवयादिनिष्ठस्य रेखात्वस्तिपुच्छस्य गवयादावविद्यमानत्वेपि गवयादिपुच्छस्यादृश्यपूर्वकाभेदाध्यवसानाद्गवयादिबोधकता वह्निमद्वा स्यनिष्ठपूर्वपदार्थप्राधान्यं समासेऽविद्यमानमपि सादृश्याद्व्ययीभावादिबोधकमित्यर्थः

दिनिष्ठत्वं गत्वादेर्वास्तविकपञ्चलक्षणत्ववदेतेषामपि न समासलक्षणत्वं। बोधकतानुत्तद्वदेव स्यादिति भावः। २९। ननु पूर्वपदार्थप्राधान्यादि समासेसु वचं। तथाहि। समर्थः पदविधिरिति सूत्रे भाष्यकारैरनेकपक्षपिपक्षेषु जहत्स्वार्था जहत्स्वार्थयोरेवैकार्थीभावव्यपक्षयोः पर्यवसानं लभ्यते। तत्र जहत्स्वार्थपक्षेऽनन्यव्यवस्थासंभाविनीत्याकांक्षामनसि स्वस्त्वाह। जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा। भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः। ३०। जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णवृत्तौ पदानामानर्थक्यमित्यर्थः। अयं भावः। समास वृत्तेयेव राजविशिष्टपुरुषभानसंभवेन राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यं। वृषभयावकादिपदे षु वृषादिपदानामिव। अन्यथा राजपदेन विग्रहवाक्यइव राज्ञः स्वार्थं त्यैणोपस्थितिसत्त्वाद्दुस्य राज्ञः पुरुष इत्यत्रेव बोधस्य राजपुरुष इत्यस्याप्यापत्तेरिति। अजहदिति। न जहति पदानि स्वार्थं यस्यां सा। अयमभिप्रायः राजपुरुषे समासादौ नातिरिक्ता वृत्तिः कल्पकाभावात्। कूलराजादिपदादेवार्थोपस्थितिसंभवे तत्कल्पनस्य गौरव

बोधके

वृत्त

राज्ञा दियदस्यापि बोधकत्वेन

ना

द

परा हतत्वा । कॢप्तशक्तित्यागो ऽप्यप्रामाणिकः कल्प्येत ॥ तथा चाकाङ्क्षादिवशात्कॢप्तशक्त्यैव बोधः अयमेव व्यपेक्षापक्षो मतां
तरत्वेन भाष्यकारैरुक्तः ॥ न चात्र मते समासे ऋद्धस्येति विशेषणान्वयापत्तिः । सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो
नेति वार्तिकात् ॥ तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधानत्वादिव्यवस्थाप्युपपादितेति भावः । प्रसंगाद्वृत्ति
भेदमपि निरूपयति । तेपुनरिति । द्वे अपि २ तीत्रिविधे । वाच्यत्रैविध्यात् [illegible] वाच्यमेवाह [illegible] भेदत्वादि । भेदो ऽन्योन्याभावः तथा
च राजपुरुष इत्यादौ अराजकीयभिन्न इति बोधः । अस्य वाच्यत्वे च राजपुरुषः सुंदर इतिवद्राजपुरुषो देवदत्तस्य चेत्यपि स्या
त् । वाच्यत्वे तद्विरोध्यान्नैवं प्रयोग इति भावः । राजसंबध्यवानिति शाब्दभानं भेदस्तु तात्कालिकमुपतिष्ठत इत्याशयेनाह ॥

उपयोग्स्यागे

संसर्ग इति । किं च निगमनाविरहं अस्वामिके राजपुरुष इति प्रयोगापत्तिं च मनसि कृत्वा भेदं वाच्यमित्याह [illegible] यं चेति । तथा
चाराजकीयभिन्नो राजसंबध्यवान्वा ऽयमिति बोधः । व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात् [illegible] कः पूर्वपदार्थप्रधा
नत्वाद्युत्सर्गो ऽप्युक्तः । किंतु रेखागवयन्यायेनोत्सर्गो ऽपि परं परस्यैव बोधक इत्याशयेन समाधत्ते ॥ समासे खलु भिन्नैव

स्वावयविसा ॥ ३१

शक्तिः पंकजशब्दवत् [illegible] नोत्पद्यति यमाणां वचनैरेव साधने । स्यान्महदोरस्वं तस्मादेकार्थीभाव आश्रितः । ३२ । समास

राजसंबध्यान्या वा
राजकीयभेदवान्वा
वाच्य इति विनिग

॥

इतिवृत्तिमात्रोपलक्षणं। समर्थः पदविधिरित्यत्र पदसमुद्देश्यको विधीयते स समासादिः समर्थो विग्रहवाक्या
र्थाभिधाने शक्तः [illegible] सन् साधुरिति सूत्रार्थस्य भाष्यालाभात् पदोद्देश्यकविधित्वं च एतत् द्वितस
मासेकत्रोपसुप्तनायं तेषां तु रूपासुपंचस्वपि वृत्तिष्वस्येव। विशिष्टशक्त्यस्वीकर्तॄणां व्यपेक्षावादिनाम
तेदूषणं शक्तिसाधकमेवेत्याशयेनाह भंपंकजशब्दं च इति पंकजनिकर्तुरपि योगादेवोपस्थितेोत्तत्रा
पिस्मुत्पत्त्यशक्तिर्न सिध्येत्। न च पमत्वरूपेणोपस्थितये सा [illegible] कल्प्यत इति वाच्यं चित्रग्वादिपदेपि
स्वामित्वेनोपस्थितये तत्कल्पनस्यावश्यकत्वात्। लक्षणयैवोपस्थितिरिति चेत् संकेतपदेपि सासुव तथो
चा। एवं रथकारपदेपि। तथा हि। वर्षासु रथकारोऽग्नीनादधीतेत्यत्रापि विनालक्षणां कुसयोगेन ग्राह्य
णादिविषयतयोपपत्तौ तत्कल्पनौचित्यात् जातिविशेषस्याधिकारित्वं प्रकल्प्य पूर्वं विधाकेस्मन
र्यां।

मि

मस्तुक्तेस्यादिति भावः ॥ साधकांतरमाह ॥ बहूनामिति ॥ एतेर्थधर्माः विशेषणलिंगसंख्यायोगादयः तेषां वचनेः
साधने गौरवं इत्यर्थः ॥ अयं भावः ॥ विशिष्टशक्त्यस्वीकारे राजपुरुषः इत्यत्रैव राजपुरुषस्य चापि स्याद्विशेषणान्व
यः ॥ राजपदेन स्वतंत्रोपस्थितिसत्त्वात् ॥ विभाषावचनेन च समासनियमवारणाय कार्यः ॥ ननु सविशेषणानामिति
वचनात्र विशेषणान्वयः ॥ विभाषावचनं च स्वतंत्रमित्याशंकां समाधत्ते ॥ वचने रेवेति ॥ न्यायसिद्धमेव सूत्रं व्यप
क्षाविवक्षायां व्यासस्यैकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसंभवात् ॥ सविशेषणेस्यापि वि
शिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासंभवात् न्यायसिद्धमिति भावः ॥ अत एव व्यपेक्षापक्षमुद्भाव्य अथे
तस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावस्ततो विशेषः स वक्तव्य इति भाष्यकारेण दूषणमप्युक्तं ॥ ३ ॥ अ
थाध्यक्षवद्दिरो निष्कोशांबि गौरथो घटनघटोरु धानाः केशान्वटः सुवर्णालंकारो द्विदशाः सप्तपर्णः

ना

वीप्सार्थौ

स्यादायित्तरेतरयोगनिष्क्रांतयुक्तपूर्णमिश्रसंघातविकारस्तुच्छस्तयल्लोपेर्वाच निकोवाच्यइति गौरवंस्यादिति दूषणं
तरमाहाचकारादिनिषेधोथबहुव्युत्पत्तिभंजनेनाकर्तव्यंतेन्यायसिद्धत्वेस्माकंतदितिस्थितिः॥३३॥ आदिनाघनश्या
मः॥ सगमनेस्यादोरवादीनांपूर्वोक्तानांचसंग्रहः॥ दूषणांतरमाह॥ बहुव्युत्पत्तिभंजनमिति॥ अयमाशयः चित्र
गुरित्यादौस्वाम्यादिप्रतीतिरनुभवसिद्धा। नच तत्र लक्षणा। प्राप्तोदकोग्राममित्यादौतदसंभवात्॥ प्राप्तिकर्त्र
भिन्नमुदकमित्यादिबोधोत्तरं तत्संबंधिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्मग्राममित्यर्थालाभात्॥ प्राप्ते
तिक्तप्रत्ययस्यैवकर्त्रर्थस्यकर्मणिलक्षणेतिचेन्न हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेस्तु
दकाभिन्नप्राप्तिकर्मेत्यर्थात्॥ अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभंगापत्तेः। प्रा
प्तेर्धात्वर्थतयाकर्तृतासंबंधेनभेदेनोदकस्यतत्रान्वयासंभवाच्च। अन्यथा देवदत्तः पच्यतेइत्यत्रकर्तृतासंब
न्धेनदेवदत्तस्यान्वयसंभवेनान्वयापत्तेः। अथोदकाभिन्नकर्तृकप्राप्तिरितिबोधोत्तरं तत्संबंधिग्रामोलक्ष्य

न गा

वै.भू.सा.
॥२८॥

तदस्तीति चेन्न। प्राप्तेर्धात्वर्थतया कार्यकर्त्रविशिष्टाया असंभवात्। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमि
ति व्युत्पत्तेः प्राप्तपदे प्राप्तेर्विशेष्यत्वेन तस्या एव नामार्थत्वे नोदकेन समम भेदान्वयापत्तेश्च। एवमूढरथः उद्धृत्त १
पशुः उद्धृतौदना बहुपाचिकेत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्ता। पशुकर्मकोपहरणोद्देश्यः। ओ
नकर्म दनकोद्धरणावधिः बहुपाककर्त्र्यधिकरणमिति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टघटप
दशक्त्यैव उदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदकशब्दादिसमुदायशक्त्यैव निर्वाहः इति भावः ॥३३॥ साधकां
तरमाह। अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना। क्लृप्तत्यागश्चास्ति तद्वत्तु किं शक्तिं न कल्पयेः ॥३४॥ अयं भावः
चित्रगुरित्यादौ चित्रगोस्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते। न च तत्र लक्षणा। सा हि न चित्रपदे।
चित्रस्वामी गौरिति बोधापत्तेः। नापि गोपदे। गोस्वामी चित्र इत्यन्वयबोधापत्तेः। चित्रादिमात्रस्य लक्ष्यै
कदेशत्वेन तत्र गवादेरन्वयायोगात्। न च चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशा

२८

५

गोस्वामीतिगोपदेन लक्ष्यत इति वाच्यं। गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासंभवात्। न च गोपदे सा
क्षात्संबंधे एव विनिगमक इति वाच्यं। एवमपि प्राप्तोदकः इत्यत्र निरुक्तस्याघषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्रसक्तेः। यौ
गिकानां कर्त्राद्यर्थकतया साक्षात्संबंधाविशेषात्। न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तं। बोधावृत्तिप्रसंगात्। न
च परस्परं तात्पर्यग्राहकत्वादेकस्यैकदा लक्षणा न द्वयोरिति वाच्यं। एवमपि विनिगमनाविरहतादवस्थ्येन लक्ष
णाया असंभवात्। न च चरमपद एव सा प्रत्ययार्थान्वयानुरोधात्। प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वे
व्युत्पत्तेरिति वाच्यं। एवं बहुव्रीह्यसंभवापत्तेः। अनेकमन्यपदार्थे इत्यनेनानेकसुबंतानामन्यपदार्थप्रतिपादकत्वेन विधा
नात्। किंच ह्येवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्। पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयो
गसंभवात्। एवं सति चरमवर्णमात्रश्रवणेर्थबोधापत्तिरिति चेदत्राप्युदकेपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्ये
त्यन्यत्र विस्तरः। एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्पत्तरकल्पना। उक्तयुक्तेः। अगत्या तु तत्पतरकल्पना। कुसस्यागः कुस

वै.भू.सा.
॥२९॥

शक्त्युपपत्तिरिति । व्युत्पत्तिसाम्यश्च तथास्तित्व किं समासे शक्तिं न कल्पयेरन्निति वा स्यार्थः ॥ यत्तु व्यपेक्षावादिनो नैयायिक
मीमांसकादयः । न समासे शक्तिः । राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधो
पपत्तेः । अत एव राज्ञः पदार्थैकदेशत्वयानन्वय तत्र शोभनस्येति विशेषणान्वयः । न वा घनश्यामो निष्कौशाम्बिर्गोरथ
इत्यादावित्यादिप्रयोगापत्तिः । उक्तार्थतया इवा[illegible]क्रान्तादिप्रयोगासंभवात् । न वा विभाषेति सूत्रावश्यकत्वं । लक्षण
या राजसंबन्ध्यभिन्न इति बोधोपपाद्यां समासस्य राजसंबन्धवानिति बोधविषयायां विग्रहस्येत्यादिप्रयोगनियम
संभवात् । नापि पंकजपदप्रवृत्तिवंथी शक्तिसाधिका । तत्रावयवशक्तिमजानतोऽपि बोधात् । न च शक्त्यग्रहे लक्षण
या तेभ्यो विशिष्टार्थप्रत्ययः संभवति । अत एव राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः । नापि चि
त्रगुरित्यादौ लक्षणासंभवे पाषष्ठ्यर्थबहुव्रीहौ लक्षणायामसंभवः बहुव्युत्पत्तिभंजनापत्तेरिति वाच्यं । प्रासादक

रस्यादावुदकपदे एव लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यत्वेन विलंबित
त्वात् । प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेर्घोषे । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमानाति
रिक्ते कस्मात्ते । विशिष्टस्यैव संकेतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चावांतरसन्निधानेन प्रत्यया
र्थान्वयसौलभ्याद्योत्तरपद एव साकल्प्यतरत्तिविशेषः । स्त्रीत्वं तु घटादिपदेऽपि चरमवर्णस्यैव वाचकत्वमीमांस
सकमान्येऽस्याहुः । अत्रोच्यते । समासे वृत्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञा न स्यात् । अर्थवत्त्वाभावेनार्थवद्धातुर
प्रत्ययः प्रातिपदिकमित्यस्याप्राप्तेः । न च कृत्तद्धितसमासाश्चेत्यत्र समासग्रहणात्स्यात् । तस्य नियमार्थतया भा
ष्यादिसिद्धत्वात् । वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये वृत्त्यभावेन शक्यसंबधरूपल
क्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात् । अथ निपूत सूत्रीत्यारभ्य ड्यो: सुबिति प्रत्या
हारे भाष्यसिद्धः तमादायातिप्रातिपदिकमित्येव सत्यपीत्तो । वृत्तमर्थवदादिसूत्रद्वयेन । समासग्रहणं च

ननु चित्रगुरस्यादौ विशिष्टे वृत्त्यस्वीकारेऽपि नार्थवत्त्वनिबंधनप्रातिपदिकसंज्ञानुपपत्तिः । तथा हि न शक्यस्य संबंधो लक्षणा । गभीरायां मत्स्यघोषौ
परसादावसंभवात् तस्य गभीरपदस्य नदीपदस्य वा तीरलक्षकत्वे परस्परमन्वयानुपपत्तिः । न च नदीपदे लक्षणा गभीरपदस्य तात्पर्यग्राहकत्वेऽपि
तिवाच्यं विनिगमनाविरहेण गभीरपदेऽपि तथात्वसंभवापत्तेः । न च नदीपदस्य द्रव्यवाचकतया साक्षात्संबंधरूपैव लक्षणा विनिगमकेति वाच्यं
गभीरपदस्यापि निरूपगुणिवाचकतया तदर्थस्यापि साक्षात्संबंधाविशेषात् । तस्मात्पदद्वयलक्षणायां गौरवात्समुदाय एव सांगीकार्या । किंतु स्व
बोध्यसंबंधरूपैव सा । अस्ति च गभीरायां नद्यामित्यत्र वाक्यलोपाद्गभीरानदीत संबंधस्तीरे इति । एवं च चित्रगुरित्यादिसमुदायस्य लक्षणया

नियमार्थमस्तु।तथाचसुप्तिङंतभिन्नंप्रातिपदिकमित्यर्थात्समासस्यापिसास्यादितिचेन्न।तथाविभक्त्येकंवर्णेपुंस
त्वावारणायार्थवत्वावच्छेदकत्वेनसमासापत्तिनादवस्थ्यमेवतथाचप्रातिपदिकसंज्ञारूपंकार्यमेवार्थवत्वमनुमापयति।धूम
इववह्निं।किंचैवंचित्रगुमानयेत्यादौकर्मत्वापन्नस्यापत्तिः।प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः।विशिष्टोत्तरमे
वप्रत्ययोत्पत्तेर्विशिष्टस्यैवप्रकृतित्वात्।यत्तुसन्निहितपदार्थगत[illegible]र्थबोधकत्वव्युत्पत्तिरेवकल्प्यतइति।तन्न।उपकुंभ
मर्द्धपिप्पलीत्यादौपूर्वपदार्थविभक्त्यर्थान्वयेनव्यभिचारात्।नचैतत्रापिसन्निधानमेव।आनुशासनिकसन्निध्येर्वि
वक्षितत्वात्।तथाचयत्पदोत्तरंयानुशिष्टासातदर्थगतंस्वार्थंबोधयति।समासेचसमस्यमानपदोत्तरमेवानु
शासनमितिवाच्यं॥अथैवंसूत्रेणविशिष्टस्यैवप्रातिपदिकत्वेविशिष्टोत्तरमेवविभक्त्यनुशासनात्।अथचप्रकृत्याश्र न
यविभक्त्यर्थान्वयइत्येवकल्प्यतामितिचेत्।पंकजमानयदण्डेनपश्यशूलिनंपूजयेत्यादौदण्डशूलेन[illegible]षा
नयनदर्शनपूजनादेरन्वयप्रसंगः।अघटानानयेत्यादौघटेप्यानयनान्वयापत्तेश्च।निर्वचनोदकादीनांविशेषणतयान

पंक स ति

नचदंडादीनां विशेषणतयानतत्रानयनाद्यन्वयः पाकान्नीलोधर्मीत्सुखीत्यादौ पाकधर्मादिजन्यतायारूपसु

न खादावन्वयप्रसंगात्। यच्चप्रवृत्त्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमितितत्नं घटंपश्येत्यत्र घट

पदात्समवायेनोपस्थितोकाशवारणाय च त्वाप्रवृत्त्यर्थत्वस्यावश्यकत्वात्। अथप्र स पदजन्योपस्थितौवि पभागवर्त्ति

शेष्यत्वं प्रवृत्त्यर्थत्वमितिचेन्न। गामानयेति कृष्णोदंडेनेत्यत्र कृष्णेनतृतीयार्थान्वयप्रसंगात्। असमस्यमानपदार्थ थ

गतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इतिचेन्न। अक्लृप्तकल्पनां कुसव्युत्पत्तित्यागं चापेक्ष्य समुदा

ति दिक्। अपिच यशक्तिकल्पनस्यैवयुक्तत्वात्। समासे विशिष्टशक्त्यस्वीकारे राजपुरुषश्चित्रगुः नीलोत्पलमित्यादौ सर्व

नि त्रानन्वयप्रसंगः। राजपदादेः संबन्धिलक्षणायामपि तंडुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तंडुलादेः पाकत्व

आवश्यक ने

यचारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुतायां ... कार्यत्वात्। पुरुषादेस्तथात्वाभावात्
तंडुलः शुभ्र इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तंडुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः शुभ्रेण तंडुलेत्यादौ विशेष
णविभक्तिरभेदार्था। पारिष्टिको वा अन्वय इति नातिप्रसंगः। तथा च समासे परस्परमन्वयासंभवाद्वाक्ये एव
तादृशे विशिष्टार्थे शक्तिः। किंच राजपुरुष इत्यादेः संबंधिनि संबंधे वा लक्षणा। नाद्यः। राज्ञः पुरुष इत्यादिविव
रणविरोधात्। समासस्य समानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयो न स्यात्। नांत्यः। रा
जसंबंधरूपः पुरुष इति बोधप्रसंगात्। विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः। इत्यादि प्रपं
चितं वैयाकरणभूषणे। अत एव वषट्कर्तुः प्रथमभक्ष इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तं। एकप्रसरत्व

भेगापत्तेरितितत्तीये। त्र्यंगैः स्विष्टकृतं यजतीत्यत्रांगानुवादेन त्रित्वविधानेन युक्तः एकप्रसरत्वभंगापत्तेरितिदशमेचनि
रूपितं संगच्छते। संगच्छते चारुणाधिकरणारंभः अन्यथारुणया एकहायन्यापिंगाक्ष्या सोमं क्रीणातीत्यत्रारुणप
दवदितरयोरप्येकत्वादिगुणमात्रवाचकतयाऽमूर्तत्वात्। क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्येव वाक्या
द्भेदशंकाया असंभवादिति प्रपंचितं भूषणे। तस्मात्समाससक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः॥
राजपुरुष इत्यादौ राज्ञा चासौ पुरुषश्चेत्येव विग्रहः। चित्रगुरित्यादौ चित्राणां गवां मित्येव समासार्थानुरोधात्। य
पि प्रथमांतानामेवैष बहुव्रीहिरिति सूत्रात् लभ्यते इति प्रथमांतपक्षे वा चित्रा गावो यस्येत्येवं संभवत्येव षष्ठीसमास
विधानाद्भासः पुरुष इति च पक्षे वा कथं तथापि न तस्य विग्रहत्वं भिन्नार्थत्वात्। किंतु कस्येवेति मीमांसका स्तान्निरस्यति॥

स्य

बहुव्रीहिरिति कथं मत्वेय

आख्यातं न द्धितवृत्तोर्यत्किंचिदुपदर्शकं। गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः।३५। तद्धितवृत्त्योर्यत्किंचिदर्थबोधकं
माख्यातं तत्र विपर्ययो दृष्टः। तथाहि। आक्षिकः कुंभकार इत्यत्राक्षकरणकव्यापाराश्रयः कुंभानुकूलव्यापाराश्र
य इति बोधः। अक्षैर्दीव्यति कुंभं करोतीत्यत्राक्षकरणिका देवनानुकूला भावना। कुंभानुकूला भावनेति बोधः। एवमस्ये
कारकाणामाख्याते भावनायाः प्राधान्यं वदतो मीमांसकस्यापीति गुणप्रधानभावाद्यव्यत्यासो न विवरणत्व
बाधक इति नात्र पाक्षिकस्यान्वित्वागावोयस्येसादेर्विग्रहत्वे बाधकमस्तीति भावः। ननु च स्तुतरीसा सर्वत्र समा
सेशक्तिः अस्तु च तथा विग्रहस्तथापि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसि
द्धांतसिद्धिर्न स्यादित्यत आह। पर्यवस्यच्छब्दबोधाविदूरमावक्षाणस्थितेः। शक्तिग्रहेंतरंगत्वबहिरंगत्वचिंतनं ३५

॥

पर्यवसन्नश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्क्षणश्च तदानीं तन्न लाघवमादाय अधिकरणविरोधस्त्वयर्थः

अयंभावः निषादस्थपतिपदं समासशक्तिपक्षे निषादरूपे निषादानां स्थपतौ निषादस्वामिके पुरुषान्तरे चेत्येवं

सर्वत्र शक्तत्वान्नानार्थं तथा च नानार्थतात्पर्यग्रहद्विशेषावगतिरिति न्यायेन तत्कल्पनायां पदद्वयेन पूर्वोपस्थितता

र्थएवोपस्थित्यादिलाघवान्नतत्कल्पनेति । परेषामपि सन्ति तात्पर्ये यष्टीः प्रवेशयेति वल्लक्षणाया दुर्वारत्वात्तात्पर्य

मेकं कल्पको दावष्यशिष्यत इति दिक् ॥ ३५ ॥ इति भूषणे समासशक्तिनिरूपणं । शक्तिप्रसंगात्तस्याः स्वरूपमाह ॥

इंद्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः शब्दानां संबंधो योग्यता तथा ॥ ३६ ॥ इंद्रियाणां स्वविषयेषु

घटादिषु यथा अनादिर्योग्यता तदीयचाक्षुषादिकारणता । तथा शब्दानामपि अर्थैः सह तद्बोधकारण

चक्षुरादीनां

65

देवदत्तादि

तैवयोग्यतासैवशक्तिरित्यर्थः ननुनबोधकारणत्वंअनादिमत्त्वंशक्तिः आधुनिकेपदेतदभावात्। अन्यथापित्रादिसं
केतज्ञानेपिअन्वयबोधप्रसंगः लाक्षणिकातिव्याप्तेश्चेतिसंकेतज्ञानमपिहेतुर्वाच्यः तथाचावश्यकत्वात्सएवश
क्तिरस्तु सचाधुनिकेपित्रादेर्गवादौचेश्वरस्येतिचेत् अत्रोच्यते। संकेतोनस्वरूपेणहेतुः अगृहीतशक्तिकादर्थबोधप्र
संगात्। नापिसामान्यतोज्ञातः प्रमेयत्वादिनातज्ज्ञानेपिबोधप्रसंगात्। नापिसंकेतत्वेनतज्ज्ञानंहेतुः गवादिप
देषीश्वरादेःसंकेतत्वेनतज्ज्ञानशून्यानांलौकिकमीमांसकानांतत्तदर्थबोधजनकत्वग्रहवतामेवबोधेनव्यभिचा
रात्। नवार्थधीजनकतावच्छेदकत्वेनतज्ज्ञानंहेतुः ततोपिलाघवेनार्थधीजनकतात्वेनैवहेतुतायामस्मत्पक्षसिद्धेः
नचाधुनिकदेवदत्तादौसंकेतज्ञानादेवबोधेनास्यव्यभिचारः तत्रापीदंपदमेतमर्थंबोधयत्वितीच्छाग्रहेपदेतदर्थ

त्व

बोधकस्यावगाहनेनव्यभिचाराभावात्। न च स्यात्तत्त्रयेणबोधकत्वात् ज्ञानं कारणं वाच्यं अन्यथानेदं तद्धीजनकमिति ज्ञानतो स्मात्पदादयमर्थो बुद्धो नेनेति ज्ञानतस्तद्ग्रहापत्तेरिति वाच्यं। नेदं तद्धीजनकमिति ग्रहवत्तो बाधेन पदे परं ग्रहं ज्ञानतोपि तद्ग्रहासंभवात्। अन्यथा भ्रांतिस्थलेऽपि भ्रांतत्वापत्तिरिति। इदं चार्थजनकत्वं पित्रादिसंकेतज्ञानात् गृहीते अन्तस्तद्ज्ञानात्पूर्वं न बोधः नापि लाक्षणिकोच्छेदापत्तिरिष्टत्वात्। शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात्। किंच प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधाजनकत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यं तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेन लाघवं। अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः शक्तिजन्योपस्थितिं विना लक्षणाजन्योपस्थितितः शाब्द-

हेतुतेति

ने

...स्थानस्यापि कारणतांगी-

वै.भू.सा.
॥३५॥

कार्यकारणभावकल्पनेपिपदतदर्थभेदेनानेक

ध्वंसानुपूर्वकरणज्ञानध्वंसासाधिकरणः सन्स्वध्वंसाधिकरणीयः क्षणः तद्वृत्तित्वे अव्यवहितोत्तरत्वं॥

बोधात्। न चाव्यवहितोत्तरत्वसंबंधेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं तत्तदुपस्थितिमत्त्वं च कारणतावच्छेदकं अनंत
कार्यकारणभावप्रसंगात्। किंच पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुत्वे व्यभिचारो गौरवं न
चेति प्रागेव दृष्टव्यं। न चेदं पदमेतदर्थबोधकमिति शक्तिज्ञान का कार्यकारणभावकल्पने गौरवं तवापि समं॥
परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यं। शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन
कार्यकारणभावानेत्यस्य तवापि साम्यात्। लक्षणाकार्यकारणभावकल्पनागौरवं परं तवातिरिच्यते। अथ वृ
त्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता वृत्तिज्ञानत्वेन पदार्थोपस्थितिकारणत्वमेवं मया वाच्यमिति चेन्न शक्तिल
क्षणान्यतरत्वेन शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबंधत्वस्य वा वृत्तित्वस्य कारणतानवच्छेद
स्य र्यकारणभावकल्पनेपि पदतदर्थभेदेनानेक ॥

68

कत्वात्। शक्तित्वमपेक्ष्य गौरवात्। शाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितित्वेन ज्ञानेन न तद्घटितकार्यकारणभाव
ग्रहस्यासंभवात्। अथ ममापि शक्तिज्ञानत्वेनैव हेतुता शक्यसंबंधरूपलक्षणायां शक्तेरपि प्रवेशात्। इति चेन्न। शक्ति
ज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्यावश्यकत्वात्। अन्यथा गंगातीरयोः संबंधाग्रहवतो
गंगापदशक्तिज्ञानतोपि गंगायां घोष इति वाक्यात्तीरबोधप्रसंगः शक्तिज्ञानस्य हेतोः सत्वात्। अपि च। घटमा
नयेति वाक्यं हस्तिनं च स्मरतो घटपदादिभ्यो घटादेः पदाद्धस्तिपकस्य च समूहालंबनस्मरणवतो घटानयन
वद्धस्तिपकस्यापि शाब्दबोधापत्तेः समूहालंबनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्वात्। तथा च विषयतया
शाब्दबोधं प्रति तद्विषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यं। एवं च लक्षणायामपि शक्तिज्ञानत्वेन हेतुत्वमसंभ

...त्या

वदुक्तिकमिति। एतेन शक्तिप्रयोज्यैवोपस्थितिर्वृत्तिरिति लक्षणाज्ञानकार्यकारणभावान्तरं ममापीति परास्तं। प्र
योज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादि विस्तरेण प्रपंचितं भूषणे॥३६॥ नचैवं भाषादितो बोधदर्शनाद्बोधक
तारूपा शक्तिस्तत्रापि स्यात्तथा च साधुतापि स्यात्। शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादितत्वादि
त्याशंकां समाधत्ते। असाधुरनुमानेन वाचकः कैश्चिदिष्यते। वाचकत्वाविशेषे वा नियमः पुण्यपापयोः॥३७॥ असाधुः

द्विधा

गाव्यादिः अनुमानेन साधुशब्दमनुमाय वाचकः बोधकः कैश्चिदिष्यते। तथा च लिपिवत्तेषां साधुस्मरणे एवोपयोगो
[illegible] नतु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः। उक्तं हि वाक्यपदीये ते साधुष्वनुमानेन प्र
त्ययोत्पत्तिहेतवः। तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः। न शिष्टैरनुगम्यन्ते पर्याया इव साधवः। न यतः स्म

त्तिमात्रेणतस्मात्साक्षाद्वाचकाः। अंबांबेत्तियदाबालः शिक्ष्यमाणः प्रभाषते। अव्यक्तं तद्विदांतेनव्यक्तेभवत्तिनिर्णयः
एवंसाधोप्रयोक्तव्येयोपभ्रंशः प्रयुज्यते। तेनसाधुव्यवहितः कश्चिदर्थोभिधीयते॥ इति। नत्वपभ्रंशानांसाक्षाद्वाच
कत्वेकिंमानंशक्तिकल्पकव्यवहारादेस्तुल्यत्वादितिचेत्सत्यंतत्तद्देशभेदेनभिन्नेष्वनंतेषुशक्तिकल्पनेगौरवात्। नच
पर्यायतुल्यताशंक्यातेषांसर्वदेशेष्वेकत्वाद्विनिगमनाविरहेणसर्वत्रशक्तिकल्पनात्। नह्यपभ्रंशेतथा। अन्यथाभा
षायांपर्यायतयागणनापत्तेश्च। एवंचशक्तत्वमेवास्तुसाधुत्वमितिनैयायिकमीमांसकादीनांमतमेतन्मतेनैवद्र
ष्टव्यं। इदानींस्वमतमाह। वाचकत्वाविशेषेवेति। अयंभावः अपभ्रंशानामशक्तत्वेततोबोधोनस्यात्। नचसाधु
स्मरणात्ततोबोधः। तानविदुषांपामराणामपिबोधात्। तेषांसाधोरबोधाच्च। नचशक्तिभ्रमात्ततोबोधः बो

वै.भू.सा.
॥३५॥

अबोधकः

धकत्वस्याबाधेन तद्धेतुस्याप्रमत्वात् । ईश्वरेच्छारूपशक्तिरिति मतेपि [illegible] सन्मात्रविषयिण्यास्तस्याबाधाभावात् । शक्तेः पद
पदार्थघटितायाः प्रमासंभवाच्चेति । उक्तं च वाक्यपदीये । पारंपर्यादपभ्रंशा विगुणेष्वभिधातृषु । प्रसिद्धिमागता येन
तेषां साधुरवाचकः । देवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः । [illegible] अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्यय इति । अवा
चकः । बुद्धिविपर्ययः एते एव वाचका नान्ये इति विपर्यय इत्यर्थः । किंच भाषायामपि विनिगमनाविरहात् शक्तिः
न च तासां नानात्वे दोषः संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात्
किंचानुपूर्वीपदे वच्छेदका । सा च पर्यायेष्विव भाषायामपि अन्यान्यैवेति कस्तयोर्विशेष इति विभावनीयं
सूरिभिः । तथा च संस्कृतवद्भाषा शब्दाः शक्ताः एवं च पर्यायतया भाषायां गणनापत्तिः साधूनामपि को

॥

दे॰ पुनायना रि

च

रूढ्यादौ विभागाभिधानात्। नन्वेषां साधुतास्यादत आह। नियम इति। पुण्यजननबोधनाय साधूनां साधुभि
र्भाषितव्यमिति विधिः पापजननोऽयसाधूनिति निषेधः तथा च पुण्यजननयोग्यत्वं साधुत्वं पापजननयो
ग्यत्वमसाधुत्वं तत्र जनकतावच्छेदिका जातिः तल्लापकं च कोशादिव्याकरणादि च एवमेव च राजस्सूयादे
ब्राह्मणे फलजनकत्ववद् द्रुवादिशब्दानां नाश्वादेरसाधुत्वमिति संगच्छते। आधुनिकदेवदत्तादिनाम्नामपि
द्व्यक्षरमित्यादिभाष्येण व्युत्पादितत्वात्साधुत्वं एवं च यः शब्दः यत्रार्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति
पर्यवसितं। गोणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वं आधुनिकला क्षणिकानां त्वसाधुत्वमिति स्प
ष्टमेव। अत एव ब्राह्मणायदेहीत्यर्थे ब्राह्मणं देहीत्यादिकं लक्षणया प्यसाधु स्यादि विस्तरेण प्रपंचितं भूषणे॥

अतिरिक्तशक्तिग्रहोपायमाह। संबंधशब्देसंबंधोयोग्यतांप्रतियोग्यता। समयाद्योग्यतासंविन्मातापित्रादि
योगवत्॥३९॥ संबंधोविषयः योग्यतांप्रतियोग्यता शब्दे प्रतियोग्यता विषय इतिसमयाद्व्यवहाराद्योग्यतासं
वित्शक्तिग्रहः घटपदमत्रयोग्यमेतत्संबंधीतिव्यवहारात्साग्राह्येत्यर्थः॥३९॥ इतिभूषणेशक्तिनिर्णयः सं॰
नञर्थमाह। नञ्समासेचापरस्यप्राधान्यात्सर्वनामता। आरोपितत्वंनञ्द्योत्यंनह्यसौ पतिसर्ववत्॥४०॥ नञ्स
मासेपरस्योत्तरपदार्थस्यप्राधान्यात्सर्वनामतासिध्यतीतिशेषः अतएवारोपितत्वमेवनञ्द्योत्यमित्यभ्युपे
यमितिशेषः॥ अयंभावः असर्वइत्यादावारोपितः सर्वइत्यर्थेसर्वशब्दस्यप्राधान्याबाधात्सर्वनामतासिध्य
ति। अन्यथातिसर्वइत्यादाविवसानस्यात्। घटोनास्तीत्यादावभावविषयकबोधेतस्यविशेष्यतायाएवदर्श

॥

नात्र अस्य [illegible] द्वीत्या चार्थो बोधो मानसः तथा चा

सर्वस्यैद्दत्याद्यसिद्धिप्रसंगात्। अत्र चारोपितत्वमारोपविषयत्वं आरोपमात्रमर्थो विषयत्वे संसर्ग इति नि

ष्कर्षः घोसत्वोक्तिर्निपातानां घोसत्वमभिप्रेत्य। ३१। घटो नास्ति अब्राह्मण इत्यादौ आरोपबोधस्य सर्वानुभव

विरुद्धत्वात् पक्षांतरमाह। अभावो वा तदर्थोस्तु भाष्यस्य हि तदनुयायात्। विशेषणं विशेष्यो वा न्यायैस्त्वच त

धार्यतां। ३०। तदर्थः नञर्थः अर्थपदं घोसत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय। भाष्यस्येति। तथा च

नञ्सूत्रे भाष्यं। निवृत्तपदार्थक इति निवृत्तः पदार्थो यस्य नपुंसके भावे क्त इति क्तः अभावार्थक इत्यर्थः य

त्तु निवृत्तः पदार्थो यस्मिन्निति। सादृश्याद्यारोपितब्राह्मण्याः क्षत्रियादेर्थीयस्येत्यर्थ इति कैयटः तन्न।

मुख्यं ब्राह्मण्यं — यो अ

ह्य क्षत्रियादेरर्थ

थे. सूत्रा.
॥३९॥

आरोपितब्राह्मण्यस्य क्षत्रियादेर्न्नञ्वाच्यत्वात् अन्यथा स्यादद्व्यादेरपि वाच्यतापत्तेः यत्तु तत्सादृश्यमभावश्च
तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिता इति पठित्वा अब्राह्मणः अपापं अनश्वः अनुद

भ्यः ह

रा अपशवो वा अन्ये गोभ्यः अधर्मो रसुदाहरंति तत्तु आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र। विशेषणमिति।
प्रतियोगिनीति शेषः तथा च असर्वपदे सर्वनामसंज्ञा [illegible] अनेकमन्यपदार्थे इत्येतेनैकया संज्ञं तौ गायेसा

पां

दावेकशब्दप्राधान्यादेकवचननियमः। अब्राह्मणस्त्वादावुत्तरपदप्राधान्यात्तत्पुरुषत्वं अत्वंभवसि अनहंभ

मी

पदार्थ

वामीत्यादौ पुरुषवचनव्यवस्था वोपपद्यते। अन्यथा त्वद्भावो मद्भाव इति वद्भावांशे युष्मदस्मदादेरन्वये
न युष्मत्सामानाधिकरण्यस्य तिङ् स्थस्य सत्वात् पुरुषव्यवस्था न स्यात् अस्मन्मते च भेदप्रतियोगित्वस्यैवा

अयिकाभवनक्रियेत्यन्वयात्सामानाधिकरण्यंनानुपपन्नमितिभावः।विशेष्यायेति।प्रतियोगिनीतिशेषः
अयंभावः गौणत्वेपिनञ्समासेएतत्तदोः सुलोपाकोरनञ्समासेहलीतिज्ञापकात्सर्वनामसंज्ञानानुपप
न्ना।असः शिवइत्यत्रसुलोपवारणायानञ्समासइतिहिविशेषणात्।नचतत्रतच्छब्दस्यसर्वनामतास्तिगौ
णत्वात्।अकोरित्यकच्सहितयोरेतत्सर्वनाम्नोरेवतत्रग्रहण लाभात्।तथाचानञ्समासइतिसुवचं अनेन ज्ञापकं
कमन्यपदार्थइत्यादावेकवचनंविशेष्यानुरोधात्सुवामंत्रितेपरांगवत्स्वरेइत्यतोनुवर्तनंसुब्ग्रहणंविशेष्य मा
मेकवचनांतमेव।किंचानेकशब्दाद्द्विवचनोपादानेबहुवचनोपादानेद्वयोर्बहूनांहिनीसिध्येदित्युभयसंग्रहा
येकवचनंजात्यभिप्रायमौत्सर्गिकंवा।सेव्यतेनेकयेत्यत्रापियोषयेतिविशेष्यानुरोधात्तथात्वेकंसेवनान्वयबो

धनार्थैकवचनं। न तूत्तरपदार्थप्रयुक्तं। अत एव पतंत्यनेके जलधेरिवोर्मयः इत्यादिकमपि सुरूपपादं अत्वंभवसीत्यादौ
युष्मदस्तद्भिन्ने लक्षणा। नञ्द्योतकः तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यानुरूपव्यवस्थात्वद्भिन्ना
भिन्नाश्रयिकाभवनक्रिये [illegible] तिरूपाद्बोध्यः एवं नपचसीत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावनाभावः घटोना
स्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोध्यः असमस्तनञः क्रियायामेवान्वयात्। सर्वोऽसत्ताभावत्वा भावोऽ
ए न्योन्याभावत्वेन रूपेणैक्यः तत्तद्रूपेण बोध्यात् इत्याद्यन्यत्र विस्तरः इति वैयाकरणभूषणे नञर्थः। प्रादयो द्योतका
नम श्चादयो वाचका इति नैयायिकमतमयुक्तं वैषम्ये बीजाभावात् इति ध्वनयन्निपातानां द्योतकत्वे समर्थते। द्योतका
श्चादय ः प्रादयो येन निपातास्तथा। उपास्येते हरिहरौ लकारेण दृश्यते यथा। येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो नि

पातास्तथा द्योतका इत्यर्थः। अयंभावः ईश्वरमनुभवतीत्यादौ वनुभवादिः प्रतीयमानो नधात्वर्थः भवतीत्यत्राप्या१
पत्तेः नोपसर्गार्थः तथा सत्यप्रकृत्यर्थत्वापात्तत्राख्याता र्थान्वयापत्तेः प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्प
त्तेः। अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च। न विशिष्टार्थः गौरवात् तथात्वधातोरेव विद्यमानत्वादिवाच
स्नात स्यात्तुतत्रलक्षणा उपसर्गार्थग्राहकत्वस्तु। तात्पर्यग्राहकत्वमेव द्योतकत्वमितितच्चादिष्वपितुल्यं। चैत्रमिव
पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यमिवशब्दस्तात्पर्यग्राहकः तस्यसुवचत्वादिति। स्वयंयुत्पत्तंतरमा
ह। उपास्येतेइति। अत्रत्तूपासनाकिंतूपसर्गार्थः विशिष्टस्यधातुमात्रस्यवा। नाद्यः तथा सतिस्वार्थफलव्यधि
करणव्यापारवाचकत्वरूपसकर्मकत्वस्यास्यधातोरुपासनारूपफलवाचकत्वाभावाद्नापत्तेः ततः कर्मणिल

वै. भू. सा.
॥५०॥

क्तारेन स्यात्। न द्वितीयः गौरवात्। न तृतीये त्वागन्तुद्योतकत्वे। तात्पर्यग्राहकत्वलाभादितिभावः। इष्यते इत्यत्र क
र्मणीति शेषः। तद्वा आदिष्वपि तुल्यमित्याह। तथान्यत्र निपातेपि लकारः कर्मवाचकः। विशेषणाद्ययोगेपि प्रादिच
आदिके समः। अन्यत्र साक्षात्क्रियते अलंक्रियते उरीक्रियते इत्यादौ अत्रापि धातोस्तत्तदर्थे कर्मणि लकार
सिध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवत्। द्योतकत्वममीषामपीत्यर्थः। यद्यपि धातोः सकर्मकत्व
विकुर्वते मस्त्येव अन्यथा वायुर्विकुरुते स्वरानित्यत्रापि सा स्यादिति भावः। अथोपासनासाक्षात्कारादिर्निपाता
र्थोस्तु। साक्षात्प्रत्यक्षतुल्ययोरिति कोशः स्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोस्तु स्वस्वयुक्तनिपाता
न्यतरार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावसुक्तावितिनेदं सा

तथाप्येषर्थेषु सकर्मकता न स्यात्।

ः कीदृशो निश्चय

नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासंभवान्निपातार्थधात्वर्थेऽन्वयस्यैवासंभवात्। अन्यथा तंडुलः प

यो

चतीत्यत्रापि कर्मतया तंडुलानां धात्वर्थेऽन्वयापत्तेरिति। किं च प्रादीनां वाचकत्वे भूयान् प्रकर्ष इतिवत् भूया
न् प्रकीदृशो निरित्यपि स्यात् अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वयः अत एव द्योतकत्वात् तेषां स्यादिति। साध
कोत्तरमभिप्रेत्याह। विशेषणेति। शोभनः समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याप्यापत्तेस्तुल्यस
मा ध्येयत्वादिति भावः। अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विनाषष्ठ्यादिकं भेदेनान्वयासंभवः
अन्यथा राजा पुरुष इत्यस्याप्यापत्तेरित्यभिप्रेत्याह आदीति। एवकारादिरित्यौः समुच्चय इतिवद्भुवस्य च रव
दिरस्य चेत्येवं स्यादिति भावः। ४२। ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरि

त्तिकार्यकारणभावो निपातातिरिक्तविषयएवेत्तिनोक्तदोषावकाशः स्यात्तत्राह। पदार्थः सदृशान्वेत्ति विभागे
नकदापिन। निपातेतरसंकोचे प्रमाणं किं विभावय। ५३। सदृशा। सदृशेन। समानाधिकरणेनेत्यावत्।
अन्वेति। अभेदेनेत्तिशेषः। विभागेन। असदृशेन। असमानाधिकरणेनेत्यावत्। अयं भावः समानाधिक
रणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेत्तिकल्पने [illegible]मानाभावो गौरवं च। अस्माकं
निपातानां द्योतकत्वादन्वय एव नास्तीत्तिनायं दोषः। अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके ला
क्षणिकमित्तिनैयायिकाः। ५३। अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादित्ति साधकान्तरमाह।
शरैरस्रैरिवोदीच्यानुद्धरिष्यन् रसानिवा। रसादावन्वयो न स्यात्सुपां श्रवणं ततः। अत्रोस्त्रस्तदृष्टेः शरैर च

ससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयं चोक्तादिशाद्वानां तत्सदृशपरत्वे इवशब्दस्यद्योतकत्वे संगच्छते। अ

न्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः। तथाहि उक्तेरित्तिकरणे तृतीया न चोक्तोऽत्र क

रणं। इत्यर्थं सदृशस्य करणत्वे पितस्य करणत्वेनानेन बोधयितुं शक्यं। अप्रकृत्यर्थत्वात् इवशब्दस्य चासत्वा

र्थकतया तदुत्तरतृतीयाया असंभवात्। संभवे वा श्रवणप्रसंगात्। उक्तशब्दोत्तरतृतीयाया अनन्वयप्रसंगा

च्चेत्याह। सुपां चेति। सुपां श्रवणं चेत्यर्थः चकारादुक्तपदोत्तरतृतीयानन्वयः समुच्चीयते। इत्यादावित्यादि

पदाद्वागर्थाविव संपृक्तौ पार्वतीपरमेश्वरौ वंदे इत्यत्र वागर्थयोर्वैदिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय

इत्यर्थस्य कर्मत्वबोधकत्वासंभवश्चेत्यूह्यते। यदि च विशेषणविभक्तिरूपे दार्थे साधुत्वमात्रं तदापीव

वै. भू. सा.
॥५२॥

स्यादे

इत्युक्तस्य वाचकत्वेनान्वय एव उक्तसदृशानां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्। बाधाद्भे
देनापि सः। नञ्युक्त्वाभिन्नसदृशाभिन्नः इत्यर्थ इ[illegible]सू: १५४। ननु त्वन्मते: ब्राह्मण इ[illegible]त्तसुरुषलक्षणाया अस्या
पत्तेः पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात् उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावात् विभ
क्तिश्च ततो न स्यात् इत्यत आह। नञ्समासे चापरस्य यो लं प्रलेय मुख्यता। यो समेवार्थमादाय जायंते नामतः
सुपः। १५५। नञ्समासादेो योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायेव। तमर्थमादायार्थवत्त्वात्प्रातिपदि
कत्वमित्यर्थः। वस्तुत अव्ययादाप्सुप इति ज्ञापकात्सुबुत्पत्तिः निपातस्यानर्थकस्येति वार्तिकाद्वा प्रातिपदि
कत्वं च तद्धितसमासाश्चेत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति वा बोध्यं। तस्माद्युक्तं निपातानां

द्योतकत्वं। उक्तं चाख्यात्यधिकरणे भार्त्तिके। चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः। क्रियते संज्ञयोसत्तेनोपसर्गनिपातयोः। तयोरर्थाभिधाने हि व्यापारो नैव विद्यते। यदर्थद्योतकौ तौ तु वाचकः स विचार्यते इति। उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवदिति वृद्धोक्तावुपसर्गपदं निपातोपलक्षणं धातुपदं पदान्तरस्येति बोध्यं। ४५। नन्वन्वयव्यतिरेकाभ्यां निपातानां तत्तदर्थवाचकत्वमेव युक्तं। बोधकतारूपशक्तेरबाधाच्च। किंचोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणास्तु तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यस्वरसेः पक्षान्तरमाह। निपातानां वाचकत्वमन्वयव्यतिरेकयोः। युक्तं वा न तु तद्युक्तं परेषां मतमेव नः। ४६। एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयो न व्युत्पन्न इति निपातातिरिक्तविषयं समानाधिक

वै·भू·सा·
॥४३॥

ना

रणप्रातिपदिकयोरभेदेन्वय इत्यपि तथेत्यगत्याकल्पनीयमिति भावः। न त्विति। नैयायिकोक्तं प्रादिचाद्योर्वैषम्य
मिति भावः। यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकसंज्ञासंभवान्निपातस्यानर्थकस्येति
विधिवैयर्थ्यं सर्वेषां द्योतकत्वे चानर्थकस्येति यथैतथा चैवं द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति तन्न। एवं हि
चादयो द्योतकाः प्रादयो वाचका इति वैपरीत्यापादनात्। सर्वथानर्थकानां पादपूरणमात्रार्थत्वेनोपात्तानां सं
ग्रहाय वार्त्तिकारंभस्यैव टीकोस्पष्टत्वा... तस्य प्रसारव्यात्। अपरेषामिति बहुवचनं मीमांसकसंग्रहाय
केवलवृक्षद्वाक्यसमुच्चयावबोधाच्च कारश्रवणे तद्बोधाच्च कार एव तद्वाचको न द्योतकः। किंच द्योतकत्वे पदांतरा
णां तत्र वृत्तिः कल्प्या चेकारादेर्द्योतकत्वे वृत्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितं तत्त

च

केचित्

त्वा

मेव

दपिनयुक्तमितिभावः। तथाहि। अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपपन्नौ। घटादिपदानां च समुच्चिते लक्षणा तात्पर्यग्राहकः प्रकरणादिवच्चकारादिरिति स्वीकारान्न शक्तिद्वयकल्पनापि। अस्माकं लक्षणाग्रहणदशायां बोध्यात् कार्यकारणभाव आवश्यकः। एवं शक्तिग्रहस्यापीति पक्षद्वयेपि कल्प्यान्तराभावेन गौरवाभावादुभयमपियुक्तमित्यभिमतं। अत एव सवाचकोविशेषाणां संभवाद्योतकोपिवेतिवाक्यपदीयं संगच्छते दर्शनान्तरीयरीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह मतमेवेति। ॥ पर्यवसितमुपसंहरन्नाह। निपातत्वे परेषां यत्तदस्माकमिति स्थितिः। व्यापकत्वाच्छक्ततायास्तु वच्छेदकमिष्यते। परेषां यन्निपातत्वं असत्वार्थकत्वे सति चादिगणपठितत्वं शक्तिसंबन्धेन निपातपदवत्त्वं वोपाधिर्जातिर्वा अस्तु त

देवास्माकमपिपरंतुप्रमाणानांसामान्येपक्षपाताच्छक्तताद्योतकतावातदवच्छेदेनैवकल्प्येतिनैयायिकोक्तं
प्राग्द्विचाद्योर्वैषम्यमयुक्तमित्यर्थः।व्यापकत्वात्सामान्यत्वात्तच्छक्ततायाइत्युपलक्षणं।द्योतकतायावेत्यपिद्र
ष्टव्यं।४७।इतिनिपातानांद्योतकत्वादिनिर्णयः।भावप्रत्ययार्थमाह।कृत्तद्धितसमासेभ्योमतभेदनिबंधनं
त्वतलोरर्थकथनेटीकायांहरिणोक्तं॥४८॥कृत्तद्धितसमासेभ्यःसंबंधाभिधानंभावप्रत्ययेन।अन्यत्ररू
ढ्यभिन्नरूपाव्यभिचरितसंबंधेभ्यइतिवार्त्तिकवचनमितिमीमांसकानांभ्रममपाकुर्वन्नाह।टीकायामि
तिमहाभाष्यटीकायांभर्तृहरिणे[illegible]त्यर्थः।त्वतलोरितिभावप्रत्ययमात्रोपलक्षणं।अयमर्थःसमासादेर्वृत्तिः
कल्प्यमानाराजादिसंबंधविशिष्टेकल्प्यतेइत्युक्तौतथाचतदुत्तरभावप्रत्ययःसंबंधंवदतीत्यर्थः।एवंचराज

भाव

पुरुषत्वं औपगवत्वं पक्तृत्वं इत्यादौ स्वस्वामिभावः अपत्यापत्यवत्संबंधः क्रियाकारकसंबंध इत्यन्वयबोधः औपग
वादावव्यभिचरितसंबंधे स्वार्थांतरघ्नि स्तद्धितउदाहार्यः। दामोदरत्वं कृष्णासर्पत्वं इत्यादौ जातिविशेषेण बोधाद
ह्। अन्यत्रेत्ति। रूढेरभिन्नरूपाद्व्यभिचरितसंबंधेभ्यश्चान्यत्रेत्यर्थः रूढिरुक्ता। द्वितीयं यथा। शुक्लत्वं। अत्र तद
स्यास्त्यस्मिन्निति मतुपो गुणवचनेभ्यो मतुपो लुगिष्ट इति लुप्तत्वात्। तद्धितांतत्वेपि घटः शुक्ल इत्यभेदप्रत्ययाद्गुण
स्येव प्रकारतया भाने जायते तृतीयं सतो भावः सत्तेति अत्र जातावेव प्रत्यय इति दिक्। दंडीत्यत्र प्रकृत्यर्थविशिष्टद्र
व्यमात्रवाचकता तद्धितस्येति वदंतं मीमांसकं प्रत्याह। अत्राद्वितीयं स्याद्दूरीनांतरगामिनां। सिद्धांते तु
स्थितं पक्षद्वयं त्वादिषु तत्र घृणुग्रत्ये। अत्र भावप्रत्ययविषये। तथाहि। दामोदरत्वं घटत्वमित्यादौ भावप्रत्ययस्य

वै·भू·सा·
॥४५॥

संबंधानभिधायकत्वेनमीमांसकानांदंडित्वमित्यादिष्वपितदभिधानेनस्यात्।प्रवृत्तिजन्यबोधप्रकारःप्रवृत्त्यर्थस
मवेतोऽस्तित्तदुत्तरभावप्रत्ययेनाभिधीयते।अन्यथाघटत्वमित्यत्रङ्यत्वादेर्दंडीत्यादौदंडादेश्चतदुत्तरभावप्रत्ययवा
च्यतापत्तेः।नचतन्मतेदंडीत्यादिबोधेसंबंधःप्रकारः।यत्तुयदा स्वसमवेतोवाच्योनास्तिगुणोपरःतदागत्यंत
राभावात्संबंधोवाच्यआश्रितस्तितन्नारुनादेःसंबंधिवाचकत्वेनोपपत्तेऽगत्यभावात्।प्रपंचितंचैतदादावेव
वैयाकरणभूषणे।ननुतवापीदंवैषम्यंकथमित्यतआहसिद्धांतेत्विति।४७।नोपक्षावाह।प्रयोगोपाधिमा
श्रित्यप्रवृत्त्यर्थप्रकारता।धर्ममात्रंवाच्यमितियद्वाशुद्धपरादमी।४८।जायंतेतज्जन्यबोधप्रकारेभावसं
ह्लिने।।प्र योगेउपाधिं निमित्तंप्रवृत्त्यर्थप्रकारतयामासमानंधर्मंवाच्यतयाश्रितत्वादयोजायंतेप्रवृत्तिज

न्यबोधप्रकारस्यापदार्थ इति भावः। ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरत्वप्रत्यये घटत्वत्वस्यापि वाच्यता स्यादित्यत्र आ
पत्तिमाह। धर्ममात्रे इति। नत्वत्र गुरुलघुविचार इति भावः तत्र घटादिविशिष्टब्रह्मसत्ताया एव घटत्वत्वादिरूपत्वा
त्। संबंधिभेदात्सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः तां प्रातिपदिकार्थं च धात्व
र्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादय इति वाक्यपदीयात्। उक्तं च तस्य भावस्त्वतलाविति सूत्रे वार्ति
ककारैः यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशः तदभिधाने त्वतलाविति। यस्य गुणस्य भावाद्(ा)श्रयत्वाद् द्रव्ये विशे
ष्ये शब्दनिवेशः शब्दप्रवृत्तिः तस्मिन् वाच्ये [illegible] त्वतलावित्यर्थः। तथा रूपादिशब्देभ्यो जातौ शुक्लाणुदीर्घमहदादिभ्यो गु च
णे पाचकादिशब्देभ्यः क्रियायां घटादिशब्देभ्यो जातौ प्रत्ययः। रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाच

विशेषणतयाभासमानस्य

वै.म.सा.
॥४६॥

कादिशब्दानां क्रियाप्रकारबोधजनकत्वेन तस्यां प्रत्ययः संसर्गप्रकारबोधजनकत्वमिति मतेन च संसर्ग इति व्यवस्था
रूपपादेति भावः तत्र जातिवाचकानां व्यक्त्य एव शक्यत्वावच्छेदिकाः तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणो
धर्म इति बोध इति द्रष्टव्यं। पक्षान्तरमाह। यद्वेति। यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति सन्ते षां भाव इति वार्त्तिकोक्तेः॥
यद्वा शब्दस्तत्स्वचनप्रयोजनकोपि। भवन्ति वाचकत्वेन प्रवर्त्तन्त इति भावाः शब्दाः स्वेन रूपेणार्थेन भवन्ति प्रवर्त्तन्ते अतः
सन्ते षां भावः प्रवृत्तिनिमित्तमिति भावः अर्थवच्छब्दोपि द्रव्यप्रकारः हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्य
स्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारबोधस्य सर्वसिद्धत्वात्। अन्यथा वनौषधिवर्गादेर्नागरिकान्प्रत्यबोधक
त्वापत्तेश्च। एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः। न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण तथा चोभयमव

श्री

छेदकं॥ पस्य तथा शक्तिग्रहस्तस्य जात्यादिरूपेणोपस्थितिः॥ पदप्रकारकः शक्तिग्रहस्तु विशिष्यानपेक्षितः किंचिदं
मदं क्वचित्तत्साधुपदत्वात्॥ इत्यादिरूप एवापेक्ष्यत इति विशिष्याग्रहीतशक्तिकेभ्यस्तथैव बोध्यः तथा च श
द्बोपि त्वप्रत्ययार्थ इति प्रपंचितं भूषणे॥ ५०॥ इति भावप्रत्ययार्थनिर्णयः॥ सास्य देवतेत्यत्र देवताविशिष्टं देयं प्र
त्ययार्थः ऐंद्रं वैश्वदेवी सा दोइं प्रादेर्देवतात्वोपस्थापकपदांतराभावात्॥ तेन रूपेणोपस्थितये शक्तिकल्पनाव
श्यकत्वात्॥ अत एवामिक्षां देवतायुक्तां वदत्येवैषतद्धितः आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणं इति॥ के
यलो देवतावाचीतद्धितोग्नेः समुच्चरन्॥ नाग्निं युक्तामग्निदेवत्वं प्रतिपादयितुं क्षम इति मीमांसकैरप्युक्तमि
त्याशयेनाह॥ प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणं ५०॥ अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः॥ देवता

ये·भ·सा·
॥५७॥

यांप्रदेयेचखंडशः शक्तिरस्तुवा।५१। एकदेशोदेवतारूपोतच्चविशेषणमभेदेनेत्याशयेनाह। अभेदश्चेति। ननुदेव
तायाःप्रत्ययार्थैकदेशत्वान्नप्रकृत्यर्थस्यतत्राभेदेनान्वयइत्याशयेनाह। देवतायामिति। तथाचपदार्थैकदेशेदे
वतास्तीतिभावः।५२। नन्वग्न्यादिदेवतायाःप्रकृत्यैवलाभान्नतत्रशक्तिःकल्प्या। नचदेवतात्वरूपेणोपस्थित्य
येसाकल्प्यते। प्रकृतेर्लक्षणयैवतथोपस्थितिसंभवात् उपसर्गाणांद्योतकत्वनयेप्रजयतीत्यत्रप्रकृष्टजयव
दित्यभिप्रेत्याह। प्रदेयएववाशक्तिःप्रकृतेरस्तुलक्षणादेवतायांनिरूढेतिसर्वेपक्षाअमीस्थिताः।५३। नचैं
द्रंदधीत्यादौद्रव्यस्यपदांतरालाभात्कुतःपुनःप्रत्ययस्यतत्रशक्तिःकल्प्येतिरतिवाच्यं। पदांतराश्रवणेपित
त्प्रतीतेःऐंद्रंदधीतिसामानाधिकरण्याच्च। अन्यथाख्यातस्यापिकर्तृकर्मवाचित्वंनस्यात्। मीमांसका

नांतुपुनः प्रत्ययस्यदेवतात्वमेवार्थोस्तुद्रव्यंपदार्थांतरात्सम्पत्तएवेति। आख्यातस्यकर्तृवद्वाच्यंमास्तुइतिकुतोन

५

नुक्ष्यतेवक्तुमितिदिक्। देवतायां। देवतात्वरूपेण। निरूढेति। अनुपपत्तिस्तानापूर्वीकत्वमनादिप्रयोगावच्छिन्नत्वंवा

नत्वमितिभावः। ५३। अनयैवरीत्या अन्यत्राप्यवधेयं। इत्याह। क्रीडायांणस्तदस्यास्तीत्यादौवैषम्यादिकृस्सत्वा। वस्तुतो

वृत्तिरेवेतिनात्रातीवप्रयासतोप्। धातदस्यांप्रहरणमितिक्रीडायांणः। तत्रप्रहरणविशिष्टाक्रीडाप्रहरणक्री

डेक्रीडामात्रंवेत्यर्थः। आदिनास्तोस्यनिवासः सास्मिन्पौर्णमासीतितदस्यास्त्यस्मिन्निति मतुबित्यादिकंग्रहणते

वृत्तिमात्रेतिरिक्तशक्तेः समर्थः पदविधिरितिसूत्राल्लाभादुक्तविचारः शास्त्रांतरीयैः सहतद्रीत्यैवोक्तः आरो

पितप्रवृत्तिप्रत्ययार्थमादायवा। वस्तुतोविशिष्टशक्त्यैवार्थोपस्थितेरित्याह वस्तुतइति। इतिवैःसारेदेवताप्र०

वृत्तिप्रसंगात्तत्राभेदैकत्वसंख्याप्रतीयतेइति सिद्धांते दृष्टांतेनोपपादयति। अभेदैकत्वसंख्यायाश्च तो भानमिति स्थि य
तिः कपिञ्जलालंभवाक्ये त्रित्वन्यायाद्यथोच्यते। यथा। संख्याविशेषाणां विभागेन सत्त्वे अभेदैकत्वसंख्या। उक्तं च वा णा
क्यपदीये। यथौषधिरसाः सर्वे मधुन्याहितशक्तयः। अविभागेन वर्त्तन्ते संख्यां तां तादृशीं विदुरिति। परित्यक्तविशे
षा संख्या सामान्यं ततः। उक्तं चाभेदानां वा परित्यागात्संख्यात्मा स तथाविधः व्यापाराज्जातिभागस्य भेदापोहेन व
र्त्तते। अगृहीतविशेषेण यथा रूपेण रूपवान्। प्रख्यायते न शुक्लादिभेदापोहस्तु गम्यते। अस्याः वृत्तौ समासादौ भा
नं न्यायसिद्धमिति शेषः। इति मतस्थितिर्वैयाकरणानां। अयंभावः राजपुरुषइत्यादौ राज्ञो राज्ञोः राज्ञां वायं पुरुष
इति जिज्ञासा जायते। विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दाद्वावश्यकी।५

अतस्तस्यां शक्तिरित्तितस्याएकत्वेनप्रतीतोमानमाह। कपिंजलेत्ति। गणनायांत्रित्वस्यैवप्रथमोपस्थितत्वात्तद्रूपेणैव
मानवदेकत्वस्यसर्वत्तःप्रथमोपस्थितत्वमस्तीतिभावः वस्तुतस्तुजिज्ञासैवनानुभवसिद्धातथात्वेवाज्ञानेच्छयोः स
मानप्रकारकत्वेनहेतुहेतुमद्भावात्तद्रूपेणैववाच्यतास्यादित्यवधेयं।५७।दृष्टितेवे॰रेभेदैकत्वसंख्यानि॰।संख्याप्रसंगा
विशेष दुदेश्यविधेययोः संख्ययोर्विवक्षाविचरेणनिरूपयन्ति। लक्ष्यानुरोधात्संख्या तंत्रान्तंत्रेमतेयत्तः। पश्वेकत्वादिहेतूनामा या
श्रयणमनाकरं।५८।ग्रहंसंमा र्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमित्तिवन्नास्माकमुद्देश्यविशेषणाविवक्षा
नियमः धातोरित्येकत्वस्यविवक्षितत्वात्।उत्पद्येतसमस्तेभ्यः धातुभ्यः प्रत्ययायदितदासर्वेषांविशेष्यतद्वशेस त्र
धातो सुवर्थवत्।इतिशाब्दांतराधिकरणेभट्टैरुक्तत्वात् आर्द्धधातुकस्येड्वलादेरित्यत्रानुवाद्यार्द्धधातुकविशेषणस्यवला

वै. भू. सा.
।।८९।।

नकारद्वयस्य

दित्वस्याविवक्षितत्वात्॥ एवं पशुनायजेतेतिवद्विधेयविशेषणं विवक्षितमित्यपि न। रदाभ्यां निष्ठातो नः पूर्वस्य च दः
स्य त्रैविध्यानापत्तेः। तथा च भिन्नमित्यादौ नकारद्वयस्याभावो न स्यात्। आहुणद्ग्रह्यं नैकत्वविवक्षायैवोपपत्तौ एकः पूर्वपरयो
रित्येकग्रहणवैयर्थ्यापत्तेश्चेति भावः। उद्देश्यार्थस्तु संख्यायालक्ष्यानुरोधात्तत्रात्तत्रैव यत्नोमतत अतः पश्वेकत्वाद्यधिकरणो
क्तहेतूनामाश्रयणं नास्माकं सिद्धान्तसिद्धमिति। आदिना ग्रहैकत्वसंग्रहः। ५६। ननु विधेयविशेषणविवक्षा आवश्यकी
अन्यथानंतयागाद्यापत्तेः भिन्नमित्यादिवदन्येषामप्यापत्तेः एकः पूर्वपरयोरित्यत्रैकग्रहणं च स्थानिभेदादादेशा
भेदवारणायेत्यभिप्रेत्याह। विधेये भेदकं तत्र मन्यत्र नियमो न हि। ग्रहैकत्वादिहेतूनामाश्रयणमनाकरं। ५७। भेदकं वि
शेषणं। तत्रैव विवक्षितं। विधेयविशेषणं विवक्षितमित्यस्तु तथाप्यन्यत्र अनुवाद्यस्य नियमो न हि। क्वचित्तत्रैव क्वचि

न्नेत्यर्थः ॥ अत्रैकवाक्यतायां हेतुर्वाक्यभेदादिस्तस्याप्यत्राश्रयणमनाकरं ॥ एकत्वविशिष्टधातुत्वत्वादित्वविशिष्टमादिधा
तुकं चोद्दिश्य प्रत्ययेऽगमादेर्विधिसंभवादिति भावः ॥ ५७ ॥ नन्वेवं भिन्नत्वात्तत्र नकारद्वयलाभो न स्यादत आह ॥ रा भ्यां
वाक्यभेदेन नकारद्वयलाभतः ॥ क्षान्तिर्नैवास्ति तत्रत्वे विधेयभेदकस्य तु ॥ ५८ ॥ चकारस्सर्वत्र निष्ठातस्य नः पूर्वस्य दका
रस्य च नकार इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः इति केसंख्याविवक्षानिर्णयः ॥ क्त्वाप्रत्ययादेरर्थं नि
रूपयति ॥ अव्ययरस्त इत्युक्तेः प्रकृत्यर्थे तुमाद्यः ॥ समानकर्तृकत्वादियोगस्मैषामिति स्थितिः ॥ ५९ ॥ तुमाद्यः तुमुन्क्त्वा
द्यः प्रकृत्यर्थे ॥ आदिना क्त्वादेः संग्रहः भाव इत्यत्र मानमाह ॥ अव्ययरस्त इति ॥ अव्ययकृतो भाव इति वार्तिकादित्यर्थः
ननु समानकर्तृकयोः पूर्वकाल इत्यादिसूत्राणां का गतिस्तत्राह ॥ समानकर्तृकत्वादीति ॥ अयं भावः ॥ भोक्तुं व्रजति

भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा। भोजनपाकक्रिययोर्विशेषणविशेष्यभावमंतरेणानुपपन्ना। अन्यथा भुंक्ते व्र
जतीत्यादावेकवाक्यतापत्तेः। तथा च तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं सामानाधिकरण्यं पूर्वोत्तर
भावो व्याप्यत्वं वा इत्यादिरनेकविधः तथा च भोक्तुं पचति भुक्त्वात्रस इत्यादौ भोजनजनिका पाकक्रिया भोजनजन्यात्र
प्तिरिति बोधः। अत एव जलपानानंतर्यस्य तत्त्वे सत्त्वेऽपि पीत्वात्रस इति न प्रयोगः सामानाधिकरण्यस्यापि संसर्गत्वे
नार्थात् समानकर्तृकत्वमपि लभ्यं। भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधि
करणात्तदुत्तरकालिकी व्रजनक्रियेति बोधः अधीत्य तिष्ठति मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभाव
काले प्रयोगाद्यदा यदा स्थितिस्स्वापश्च तदा तदाध्ययनं मुखव्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्या

प्यत्वं सामानाधिकरण्येन च संसर्गः एवं चान्यलभ्यत्वान्नैतेषां वाच्यत्वलाभ इति युक्तमव्ययकृतो भाव इति। एवं च प्रकृत्यर्थ सूत्रा
क्रिययोः संसर्गो तात्पर्यग्राहकत्वरूपद्योतकत्वं क्त्वादीनां। अत एव समानकर्तृकयोरिति सूत्रे स्वरूपाद्धे नोपात्तत्वात्ते
ति भाष्यप्रतीकमुपादाय पूर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः। यत्तु समानकर्तृ
कयोरिति सूत्रात् समानकर्तृकत्वं क्त्वावाच्यं अन्यथौदनं पक्त्वा अहं भोक्ष्ये इत्यत्र मयेति तृतीयाप्रसंगः न चाख्या
तेन कर्तुरभिधानान्नेति वाच्यं। भोजनक्रियाकर्तुरभिधानेपि पाकक्रियाकर्तुस्तदभावात्। अनभिहिते भवतीति
पर्युदासाश्रयणात्। अत एव प्रासादे आस्ते इत्यत्र प्रसदनक्रियाधिकरणस्याभिधानेप्यास्तिक्रियाधिकरणस्यान
भिधानात् सप्तमीति भाष्ये स्पष्टं तस्मात् क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकमिति। तन्न। सूत्रात्तस्य वाच्यत्वाला

वै॰भू॰सा॰
॥८१॥

न्यथा

भात्। समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वा इत्येवं तदर्थात्। अ[illegible] समानकर्तृत्वेऽपि लेवस्तत्र न्यासः स्यात् तत्ती
यापादनं तु आख्यातार्थक्रियायाः प्रधानीभूतायाः अभिधानात् प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न संभवति। उक्तं
च वाक्यपदीये। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया

स्थये
मया

शक्तिः प्र[illegible]नाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि प्रतीयते इति। किंच अन्यथा कर्मणोऽपि क्त्वार्थतापत्तिः।
[illegible]प स्कोट[illegible] द नोऽभ्युद्यते इत्यत्र द्वितीयायाः प्रकारांतरेणावारणात्। दिङ्मात्रं तां विस्तरः॥५८॥ इति क्त्वार्थनिर्णयः
सिद्धांतनिष्कर्षमाह। वाक्यस्फोटेति निष्कर्षे तिष्ठतीति मतस्थितिः। साधुशब्दांतर्गता हि बोधका न तु तत्स्मृताः
यद्यपि वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखंडपदवाक्यस्फोटौ। वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्य

ष्टेस्फोटः सिद्धांतसिद्धइतिवाक्यग्रहणमनर्थकंदुरर्थकंचात्तथापिवाक्यस्फोटातिरिक्तानामपिअवास्तवत्वबोधनायतदुपाद

नं ने। एतदेवध्वनयन्ति। अतिनिष्कर्षइति। मतस्थितिर्वैयाकरणानांमहाभाष्यकारादीनां। तत्रसर्वान्तान्निरूपयन्वर्णस्फोटंप्रथ

ममाह। साधुत्वाद्धइति। साधुत्वाद्यंतर्गतावाचकानवेतिविप्रतिपत्तिः। विधिकोटिरन्येषांनेतिवैयाकरणानां। साधुत्वाद्दे

पचतिरामइतिप्रयुज्यमानेंतर्गतास्तिब्विसर्गादयएवबोधकावाचकास्तस्यैवत्वान्तत्वस्यप्राग्व्यवस्थापितत्वात्। नतुते

स्मृतास्त्यादयस्त्यादयश्चेत्यर्थः।१९। यत्तुप्रयोगांतर्गतास्तिबादयोनवाचकास्तेषांबहुत्वेनत्वानन्त्यानेसापत्तेः एषांचक्रेअसे

स्यादावादेशाभूतलुगादेरभावरूपस्यबोधकत्वासंभवाच्च। किंतुतेस्मृतालकाराः स्यादयश्चवाचकाः लत्वस्यजातिरूप

कृतौ तयाशक्तानवच्छेदकत्वेविलात् अव्यभिचाराच्च। आदेशानांभिन्नतयापरस्परव्यभिचरितत्वात्। लः कर्मणीत्याद्यनुशास

वै·भू·सा·
॥५२॥

नानुगुण्याच्चानन्त्यादेशेष्वर्थबोधकमनुशासनमुपलभामहे इत्याहुस्तान्स्वसाधकयुक्तिभिर्निराचष्टे॥ व्यवस्थितेर्व्यवहृतेस्त
द्धेतुन्यायतस्तथा। किंचाख्यातेन शत्रादेर्लडादेश्च स्मार्यते यदि। कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय॥ ६०॥ व्यवस्थानुरोधात्त
प्रयोगांतर्गतत्व एव वाचका न तु तत्स्मृत्ता इत्यर्थः तथाहि। पचतीत्यादौ लटमविदुषां बोधान्न तस्य वाचकत्वं। न च तेषां तिङ्
क्षु शक्तिभ्रमाद्बोधः। न स्य भ्रमत्वे मानाभावः आदेशानामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नभिन्नानामभ्युगमात्कः शक्तः
कोनेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवं व्यभिचारश्च। अस्यैवा आदेशानां प्रयोगांतर्गततया नित्यत्वाच्चानुशक्तं तेषां शक्त
त्वं। तथा चादेशस्मरणकल्पना नेति लाघवं। साधकांतरमाह। व्यवहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः स च श्रूय
माण तिङादिष्वेवेति तत्त्व एव वाचका इत्यर्थः। किंच तद्धेतुन्यायत इति। लकारस्य बोधकत्वे मल्लरसत्तोपि बोधः स्यात्। तादृशबो

वाचकत्वे

त्थेपचतीतिसमभिव्याहारेपिकारणमितिचेन्नहिआवश्यकत्वादस्तुताद्दशसमभिव्याहारस्यैववाचकत्वग्राहकत्वमितिः अन्यथाल

कारण कारस्यवाचकत्वंसमभिव्याहारस्यवान्वकत्वमित्युभयंकल्प्यमितिगौरवंस्यात्। तथाचताद्दशसमभिव्याहारएवसमभि

व्याहृत्तावर्णा येसत्रविनिगमकाभावात्प्रयोगांतर्गतावर्णावाचकाइतिसिध्यतीतिभावः। अपिचलकारस्यैववृत्तिलः क

र्तृभावनावाचकत्वव्यवस्थात्वसिद्धान्तस्यादित्याह। किंचेति। आदेशानांवाचकत्वेतिङ्त्वेनभावनायांआनत्वादिनाकर्तरि

रिस्युप शक्तिं स्यादितिविभागइतिभावः। नचशानजादौलतिर्लकारार्थः आश्रयः शानजर्थइत्यस्तुकर्तरिकृदित्यनुशासनादितिशं

क्यं। स्थान्यर्थेननिराकांक्षतयाशानजादेःकर्तरिशक्त्यप्रवृत्तेः अन्यथाघञादावपिप्रवर्तेत। ९०देवदत्तःपचमानइत्यादौसा

मानाधिकरण्यानुरोधाच्छानचःकर्तावाच्यःस्यादित्याशंक्याह। तरवाद्यंतत्तिङ्स्थास्तिनामतावदस्त्विवस्तुतानामार्थयोर

भेदोपि तस्मात्तुल्योवधार्यतां॥ अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः॥६१॥ पचतितरां चैत्रः पचतिकल्पं चैत्र इत्यादौ
नामार्थत्वात्संख्यान्वययोः संभवत्वेपि कर्तृवाचकता स्यादिति भावः। न च पचतिकल्पमित्यत्र सामानाधिकरण्या
नुरोधात्कर्तरि लक्षणा पचमानइत्यत्र शप्पापत्तेरिति लः कर्मणीत्यनुशासनेन लाघवाय कल्पितेन लकारे कर्त्रा
क. दिवाच्यत्वकल्पितमादायेत्युक्तं॥ इति वर्णस्फोटनिरूपणं॥ एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोपि सिद्ध इत्य
वेसाह। अथेत्यादि। आदेशास्तिप्विसर्गादयः। अयं भावः समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णस
मभिव्याहाररूपपदस्य वाचकता सिध्यति। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्। प्रत्येकवर्णानामर्थवत्वे
न प्रातिपदिकत्वेन लोपः प्रातिपदिकांतस्येत्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च। एतच्चान्त्यवर्ण एव
पत्तौ

वाचकत्वशक्तिः शक्तेर्व्यासज्यवृत्तित्वेमानाभावात्त। पूर्वपूर्ववर्णानुभवजन्यसंस्कारात्श्चरमवर्णार्थधीजननेसहकारि
न णइतितन्मात्रोच्चारणादर्थधीरितिवर्णस्फोटवादिनांमतंतत्तरस्यदूषणायोक्तं। रामोस्तीतिवक्तव्येरामइत्यस्या
नंतरंघटइ कोत्तरमकारोच्चारणेर्थबोधापत्तातादृशानुपूर्व्याएवशक्ततावच्छेदकोक्तिसात्त।६१। सुप्तिङंतंपदमि
तिपारिभाषिकपदस्यवाचकत्वेस्वीकर्तृणांमतमाह। घटेनेत्यादिपुनर्हिमहत्त्वाद्भिदास्थित्ताावस्नसादावि
चेहापिसंप्रमोहोहिदृश्यते।६२। घटेनेत्यादौघटइतिप्रकृतिःनेतिप्रत्ययःघटेतिप्रकृति रेनेतिप्रत्ययइतिविभा
गस्यसर्वेसर्वपदादेशाइतिस्वीकारेविनिगम्यप्र कृतिप्रत्यययोर्ज्ञानासंभवान्नवाचकत्वमित्यर्थः। वैयाकरणे
र्विभागःकल्पितइत्याहदृष्टान्तव्याजेनहे वस्नसादाविति। बहुवचनस्यवस्नसाविति समुदायस्यादेशविधानाज्ञा

107

वै.भू.सा.
।।५४।।

चतद्विभागः संभवती स्वर्थः।५२।सुप्तिङ्‌ तत्त्वयरूपवाक्यस्यापि तदाहा हरेरेवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चि
नु।अर्थेविशिष्टसंबधाग्रहणंचेत्समंपदे।लक्षणादध्युनान्वेन त्यदेर्थेप्यस्तु तत्तथा।५३।हरेरेवविच्छेदोवेत्यादौ प
दयोरेकः पदांतादतीत्येकादेशो ∴ सतिनतद्विभागः सुज्ञानः तथाचप्रत्येकपदाज्ञानेपि समुदायशक्तिज्ञा
नाप्याद्बोधात्समुदायेप्यावशिष्यकाशक्तिः एवंचप्रकृतिप्रत्ययेषुविशिष्यान्वायमानेष्वपिसमुदायस्युत्सया
बोधात्तत्राप्यावशिष्यकेवशक्तिरितिभावः।वस्तुतः पदैः पदार्थबोधवद्वाक्येनवाक्यार्थबोध इतिपदार्थशक्तिः
पदेप्वि वाक्यार्थशक्तिर्वाक्येभ्युपेयेतिपदस्फोटवाक्यस्फोटौ।अत्र स्थितौ।अन्यथा घटः कर्मत्वमानयनं
दृत्तिरित्यादौ तादृशव्युत्पत्तिरहितस्यापिबोधप्रसंगः।घटमानयेत्यत्रैवपदार्थानामुपस्थितौ सत्यपित्ता

सर्वज्ञाने बोधाभावात् तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकपदोत्तरं कर्मत्ववाचकाम्विभक्तेस्ततो धातोस्ततआ
ख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवत्तो बोधात् तज्ज्ञानमपि हेतुरिति चेन्न तर्हि सिद्धौ वाक्यस्फो
टः घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्यैव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूप
वाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्। अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्व
स्यैव शक्तित्वात्। पुरुषैश्चेत् तन्न विषयतासंबन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः विवेचितं चैतत्
भूषणे। ननु वाक्यार्थस्यापूर्वत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्याह। अर्थ इति। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे
विशिष्य शक्तस्य ग्रहणं चेत्तर्हि पदेऽपि समं पदे एवान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासंभवस्तुल्य इत्यर्थः। यदि च पदश

वे·भू·सा·
११५५।

न्वये

क्तिः पदार्थांशे ज्ञातान्वयांशेऽज्ञातोपयुज्यत इति कुसुमाञ्जलिवादः तदा मैमांपि वाक्यशक्तिरज्ञातेवोपयुज्यते इति वाच्यु
पगमस्तुल्य इति भावः न तत्र वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेपि तद्ग्रह इति चेत्तुल्यमित्याह लक्षणादि
दिति। लक्ष्यते तत्वर्ण्यते नेनेति लक्षणं मनस्तस्मात् अपिः पदपदोत्तरं योज्यः पदेपि लक्षणाग्रहश्चेत्तर्हि वस्तुवाक्येपी
त्तिशेषः। वस्तुतस्तु समुदितार्थविशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति ध्येयं।६३
इयमेव मीमांसकानां वेदान्तैकदेशिनां च गतिरित्याह। सर्वमेव हि वाक्यार्थो लक्ष्य एवेति ये विदुः। भाट्टास्तेपीत्थ
मेवाहुर्लक्षणया ग्रहं गतिं।६४। भाट्टा इति। तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणं। स्पष्टमेत
त। ननूक्तपक्षद्वयमनुपपन्नं। उत्पत्तेरभिव्यक्तेर्वैकदाऽसंभवेन वर्णसमूहरूपपदज्ञानासंभवात् तथा च सुतरां त

त्वसमूहरूपवाक्यत्वानासंभवइतिचेन्न।उत्तरवर्णप्रत्यक्षसमयेतस्मिन्नव्यवहितोत्तरत्वसंबंधेनोपस्थितपूर्ववर्णवत्वं
तथातदुत्तरप्रत्यक्षकालेउपस्थितविशिष्टतद्वर्णवत्वंतस्मिन्सुग्रहमितितादृशानुपूर्वीघटितपदत्वस्यवचाक्य
न त्वस्यसुग्रहत्वात्।१९४।इदानींमखंडपक्षमाह।पदेवर्णा।विद्यंतेवर्णेष्ववयवानच।वाक्यात्पदानामत्यंतंप्रविवेको
नकश्चन।१९५।पदेपचतीत्यादौ।नवर्णाः।नानोवर्णसमूहःपदमितिभावः।दृष्टांतव्याजेनाह।वर्णेष्विति।एकारो शेषः
यथा कारऌकारऋकारादिवर्णेष्ववयवाःप्रतीयमानाअपिनेत्यर्थः।क्वचिदिवेत्येवपाठः।एवंवाक्येप्याह।वाक्यादिति
पदानामपिवाक्याद्विवेकोभेदोनास्तीत्यर्थः।अयंभावः।वाक्यंपदंचाखंडमेव।नतुवर्णसमूहः।अनंतवर्णकल्पने
मानाभावात्।नतद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठतत्तद्वर्णजनकतायाव्यंजकतायावावच्छेदकंचेत्तासमा

वै.भू.सा.
११५६५

दायेवककारोगकार इत्यादिप्रतीतिवैलक्षण्यसंभवात्। स्पष्टं भामत्यां। तारत्वादिश्चायुनिष्ठं वर्णेष्वारोप्यते इत्युक्तं देवद
त्ताधिकरणे। न चैवं वायुसंयोगएव वाचकोऽपि किं न स्यादिति वाच्यं। प्रत्यक्षोपलभ्यमानककारादेरेव प्रत्यक्षोपलभ्य
मानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यंसेयंगका
र इति प्रतीत्या च स्फोटोऽखंडः सिध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवात्प्रथमा
णवर्णानामेव वाचकत्वमस्तु इत्यपास्तं। तेषां स्फोटातिरिक्ताभावात्। यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकमर्थबोधाप
त्तिः समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां ज्ञानमसंभव्येवापूर्वपूर्ववर्णानुभवसंस्कारसह
कारेणैकदा समूहालंबनरूपसकलज्ञानसंभवस्तु सरोरसः जरा राजा नदी दीनादिसाधारण इत्यतिप्रसंग इति
वा

दि
एवा
त्वा

१६

स्वेद्रोनादाभि

वर्णानां प्रत्येकं वा व्यंजकत्वेन अनुपपत्तिः इति केचन। तत्तुच्छ पद ज्ञान संभवस्योपपादितत्वात्। वर्णानां प्रत्येकं वा

स्फोट एवा — व्यंग्यो वाचक इति केचन। तत्तुच्छं पदज्ञानसंभवस्योपपादितत्वात्। वर्णानां प्रत्येकं वा

स्फोट एवा यदि व्यंग्यो वाचकः इत्थं केषाम् मतेष्वपि दोषः तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां

स्यादि व्यंजकत्वे समुदितानां वेति विकल्पग्रासाच्चानन्तुत्वमतेप्यपदोषः तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां

व्यंजकत्वे समुदितानां वेति विकल्पग्रासाच्चानन्तुत्वमतेप्यपि दोषः तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगा अभिव्यंजकाः परन्तु

प्रत्येकं व्यंजकत्वं समुदितानां वेति विकल्पगणसंभवादिति चेदुच्यते। प्रत्येकमेव संयोगा अभिव्यंजकाः परन्तु

केचिद्रत्वेन केचिद्दोत्वेन केचिद्विसर्गत्वेनेत्यनेकप्रकारे अत एव वर्णानां तदतिरेकास्वीकारेप्युपपद्यते।

एवं चाव्यवहितोत्तरत्वसंबंधेन पदत्वं तत्कारणत्वं तत्स्वतादृशपदज्ञानकारणतायाम् अविवादात्। परं त्व

व्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिज्ञानविषयत्वं वाच्यं अत एव पदज्ञानानन्तरज्ञानविषयत्वस्

क पानुपूर्व्यादिर्नैयायिकरद्धानां व्यवहारः एवं च न कश्चिद्दोषः एतेन पर्यायस्थलेष्वेक एव स्फोटो नाना वा। ना

सति तत्स्फोटे

न

घः। घटपदे एवं गृहीतशक्तिकस्य कलशपदाद्बोधप्रसंगात् न च तत्पर्यायाभिव्यक्ते शक्तिग्रहः तत्पर्यायश्रवणे ऽर्थधी
हेतुरिति वाच्यं। एवं प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्पर्यायागतशक्तिग्रहहेतुताया उचितत्वात् तथा सति स्फोटेन
शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च। अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः। अ
नेकपदार्थानां तेषां शक्तिं चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तं। पर्यायेष्वनेक
शक्तिकल्पनस्वीकारस्य सर्वसिद्धत्वात्। तत्तच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक्। शब्दकौस्तुभे तु वर्ण
मालायां घटमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः। अन्यथा कपालातिरिक्तघटासिद्धिप्रसंगश्चेति प्रतिपा
दितं ॥५॥ नन्वेवं शास्त्राप्रामाण्यप्रसंगः पदस्याखंडत्वात्। शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमा

थैत्वादित्याशंक्य समाधत्ते । पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ॥ उपेयप्रतिपत्त्यर्था उपाया अव्यव
स्थिताः ॥ उपेयप्रतिपत्त्यर्थं यत्तेनान्वयः । अयं भावः । आनंदवल्ल्यामन्नप्राणमनोविज्ञानानंदात्मकपंच
कोशाद्युत्पादनं वास्तव पुच्छब्रह्मबोधनाय । एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटबोधनाये
वेत्ति । ननु प्रत्यक्षस्य स्फोटस्य श्रवणादित्तोपि बोधसंभवान्न शास्त्रं तदुपायः इत्यत आह । उपाया इति । उपा
यस्योपायांतरदूषकत्वात् । तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते । मंत्रजन्यमिवार्थस्मरणे
वेदांतजन्यमिव ब्रह्मज्ञाने तस्य च ज्ञानस्य यज्ञादीनामंतःकरणशुद्धाविव शरीरशुद्धावुपयोगः साक्षा
त्परंपरया वा स्वर्गमोक्षादिहेतुत्वं च तदुक्तं वाक्यपदीये तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितं पवित्रं

यथा
न
दि

सर्वविद्यानामधिविधंप्रकाशन्ते। इत्स्मायंपदस्य्या नं सिद्धिसोपानपर्वणां। इयंसामोक्षमाणानामजिह्मा
राजपद्धतिः अत्रातीतुविपर्यासः कैवल्यमनुपद्यत इति। न चालीकयाप्रवृत्तिप्रत्ययकल्पनयाकथंवास्तवंबो स्फोट
ध्यः तस्याअलीकत्वासिद्धेर्वक्ष्यमाणत्वात्। एवंरेखागवयन्यायआदि नागदत्तत्वानुस्फोटस्यवर्णजाती
तीनांचनित्यत्वयाककारउत्पन्नइतिनस्यात्। वायुसंयोगनिष्ठजातेस्फोटेभानेकादिप्रती तीनांभ्रमत्वाप
त्तिश्चेत्सत्यमाह। कल्पितानामुपाधित्वंस्वीकृतंहिपरैरपि। स्वरदे , यपिह्यन्येवर्णेभ्योन्यस्यमन्यन्ते। स्वी ध्यो
२ कारस्थमाह। स्वरदेर्ध्वायपीति। आदिनोत्पत्तिविनाशसंग्रहः। उदात्तत्वादिनवर्णनिष्ठं तस्यैकत्वान्नित्य
त्वाच्च। सएवायमितिप्रत्यभिज्ञानात्। नचगत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः। व्यक्तयं

गुणभेदस्यापि भासमानस्य विनाबाधकं त्यागायोगात्। न चोत्पत्तिप्रतीतिर्विरोधिका। प्राग सत्त्वे सति सत्त्वरूपा

वि याउत्पत्तेर्वर्णेष्वनुभवं स्फुटत्वात्। अत एव वर्ण मुच्चारयतीति प्रत्ययो न तु सादयतीति प्रत्ययो व्यवहारश्च

उच्चारितत्वं च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वं। किं च व्यंजकध्वनिनिष्ठोत्पत्त्यादेः परंपरया

त्व वर्णनिष्ठविषयत्वेनाप्युपपत्तेर्न सातिरिक्तवर्णसाधिका परंपरया वर्णनिष्ठत्वाभ्युपगमाच्चैन प्रपत्ते

साक्षात्संबंधांशे भ्रमरत्नं वशिष्यते तदपि सोयमि[illegible] भेदांशे भ्रमवत्तुल्या परं तु ममातिरिक्तव नव

र्णतत्प्रागभावध्वंसकल्पनानेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः तदुत्पा

दकशंखाद्यभावेन तदसंभवश्चेति वाच्यं। ककाराद्युच्चारणस्थले तत्तत्स्थानस्पर्शिकायाः रूपं दत्त

रपातेवर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनाडिताभिघातजन्यवायुकंठसंयोगादेर्ध्वनिजनकत्वेकल्पना

त्पत्तेर्ध्वनत्य

त्। तस्य च वर्णात्सत्तिस्थलेपि सत्त्वात्तेनैव प्रतिबध्यप्रतिबंधकभावकल्पनान्निष्प्रामाणिकी स्यादिति गौ
रवं विपरीतं। एवं परस्परविरोध्युदात्तत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः एवं चोत्पत्त्या
दिप्रतीतीनां तत्त्वमात्वे स्वैर्निर्वाहः परेषामपि समान इति प्रतिबंधे बोत्तरमिति भावः ६७। इत्थं न्वपंच
व्यक्तिस्फोटाः जातिस्फोटमाह। [illegible] कचे जाते लौघवमीक्ष्यतां औपाधिको वा भेदोस्तु
वर्णानां तारमंदवत्। ६८। अयं भावः वर्णास्तावदावश्यकाः उक्तरीत्या सोयं गकार इति वचो यं ग
कारः श्रुतः सोयं हकार इत्यपि स्यात्। स्फोटस्यैकत्वात्। गकारो यं न हकार इत्यनापत्तेश्च किंच स्फोटे
गत्वाद्यभ्युपेयं न वा। आद्ये तदेव गकारोस्तु वर्णनित्यत्ववादिभिरतिरिक्तगत्वानंगीकारात्। तथा
चातिरिक्तस्फोटकल्पने लाघवं गौरवं अंत्ये गकारादिप्रतीतिविरोधः वायुसंयोगवृत्तिध्वनिवृत्तियावे

ज्ञात्वमारोप्यतथाप्रत्ययइतिचेन्न। प्रतीतेर्विनाबाधकंभ्रमत्वासंभवात् अस्तुवावायुसंयोगएववाचका
स्तेपितस्यातींद्रियत्वदोषइतिचेद्धर्मवदुपपत्तेरितिचेत्तंस्फोटेनातस्मात्संस्तेववर्णाः परंतुनवाचकाः गोत्ववत्
आकृत्यधिकरणन्यायेनजातेरेववाच्यत्ववाचकत्वस्यापियुक्तत्वात् इदंचहरिपदइत्यनुगतप्रतीत्याह
र्युपस्थि तित्वावच्छेदेनहरिपदज्ञानत्वेनहेतुत्वात्तदवच्छेदकतयाचजातिविशेषस्यावश्यकत्वात् नच   स्यप्य
घर्णानुपूर्व्यैवप्रतीत्यवच्छेदकयोर्निर्वाहः घटघटत्वादेरपिसंयोगविशेषविशिष्टमद आकारादिभिश्चा
न्यथासिध्यापत्तेः तस्मात्सा जातिरेववाचिकातादात्म्येन वच्छेदिकाचनन्नुसरोरसइत्यादौज्ञात्वोः   तद
सत्वादर्थभेदबोधोनस्यादित्यतआह। औपाधिकोवेति। वात्वर्थः। उपाधिरानुपूर्वीसैवजातिविशेष
स्याभिव्यंजिकेतिभेदःकारणीभूतज्ञानस्येतिनातिप्रसंग इतिभावः। उपाधिप्रयुक्तवैलक्षण्यपद

हेतुत्वंचतदवच्छेदककोटिप्रविष्ट

पे. भू. सा.
६०

जाते: ष्टांतमाह। वर्णानामिति। ननु प्रत्येकं वर्णेष्वपि सत्वात्प्रत्येकादर्थबोधः स्यादत आह। अनेकव्यक्त्यभिव्यंग्या
जातिः स्फोट इति स्मृता। केश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः। अनेकाभिर्वर्णव्यक्तिभिरभिव्य
क्तैव जातिः स्फोट इति स्मृता।। योगार्थतया बोधिकेति यावत्। अनेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधा
पत्तिरित्यपास्तं। अयंभावः। यद्यपि वर्णस्फोटपक्षे उक्तदोषोस्ति तथापि पदवाक्ययोर्नैतत्र तस्याव्या
सज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति। केश्चिद्व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादि
त्यभ्युपेयत इति शेषार्थः। उक्तं हि काव्यप्रकाशे। बुधैर्वैयाकरणैः प्रधानीभूतस्फोटव्यंजकस्य शब्दस्य ध्व
निरिति व्यवहारः कृत इति।।६९।। ननु कासा जातिस्तत्राह। सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थि
तौ। सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः।।७०।। प्रतिभावं प्रतिपदार्थं सत्यांशो जातिः असत्या व्यक्त

मादायेति

यः तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तं च कैयटेन। असत्योपाध्यवच्छिन्नं ब्रह्म सतत्त्वं द्रव्यशब्द
वाच्यमित्यर्थ इति। ब्रह्मतत्त्वमेव शब्दरूपतया भातीति च। कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वा
दनित्यत्वं आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः संगच्छतां। अविद्या आविद्यको धर्मविशेषो वे
ति पक्षांतरं द्रष्टव्यं॥ तमेव सत्यांशं स्फुटयति। इत्थं निष्कृष्यमाणं यच्छुद्धतत्त्वं निरंजनं। ब्रह्मैव तत्स्वक्षरं
प्राहुस्तस्मै पूर्णात्मने नमः। अयं भावः। नामरूपे व्याकरवाणीति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव
नाम्नोपि तत्त्वमेव प्रक्रियांशस्त्वविद्या जृंभणमात्रं। उक्तं च वाक्यपदीये। शास्त्रेषु प्रक्रियाभेदैरविद्यैवो
पवर्ण्यते। समारंभास्तु भावानां मा दिनैव ब्रह्म शाश्वतमिति। ब्रह्मैव तदनेनात्रायं पुरुषः स्वयंज्योतिः तमे
व भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिसिद्धं स्वपरप्रकाशकत्वं सत्त्वयन् स्फुट

देवत मस्तु

शाके शशीसुतरे सप्तदशाशूत्तमिते माघे द्वितीयायां आदित्यामे श्रीलक्ष्मभट्टात्मज जगन्नाथसूनुपाळ्हविदुषा लि
खितोयं ग्रंथः श्रीगुरुः प्रसन्नः

[OrderDescription]
,CREATED=28.09.20 15:32
,TRANSFERRED=2020/09/28 at 15:48:40
,PAGES=122
,TYPE=STD
,NAME=S0003749
,Book Name=M-1633-VYAKARAN BHUSHAN SAH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,